THE

GITAGOVINDA,

A POEM

BY

JAYADEVA GOSWAMI

EDITED WITH A COMMENTARY

BY

PANDIT JIBANANDA VIDYASAGARA B. A.
Superintendent Free Sanskrit College.



CALCUTTA

PRINTED AT THE SARASWATI PRESS.

1882.

To be had from Pandit Jibananda Vidyasagara B. A.
Superintendent Free Sanskrit College, Calcutta.

एतानि मुद्रितसंस्कृतपुस्तकानि ।

गीतगोविन्दकाव्यम् ।

श्रीजयदेवगोस्वामिविरचितम् ।

बि. ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

विरचितटीकासमेतम् ।



कलिकाता राजधान्याम् ।

सरस्वती यन्त्रे

मुद्रितम् ।

इं १८८२

THIS WORK

IS DEDICATED TO

HIS HIGHNESS MAHARAJAH
LACHMISHWAR SING BAHADUR

OF

DURBHANGA,

IN

ACKNOWLEDGMENT OF THE
DEEP INTEREST SHEWN BY HIS HIGHNESS
FOR THE ADVANCEMENT OF SANSKRIT LEARNING

AND

OF THE LIBERAL PATRONAGE AFFORDED TO THE
CAUSE OF SANSKRIT LANGUAGE BY THE
ANCESTERS OF HIS HIGHNESS,

WITH DEEP REGARD AND ESTIMATION

BY

JIBANANDA VIDYASAGARA. B. A.

the Commentator.

गीतगोविन्दे

प्रथमः सर्गः ।

सामोददामोदरः ।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे ! गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥ १ ॥

प्रणम्य भारतीं देवीं भक्ताभीष्टप्रदायिनीम् ।
गीतगोविन्दविवृतिं प्रकरोमि यथामति ॥

इह खलु तत्रभवान् जयदेवकविः प्रारिप्सितस्य निर्विघ्नेन परिसमाप्त्यै राधामाधवयोः रहःकेलिरूपमङ्गलमाचरति मेघैरिति । कदाचित् कस्मिन् वने गोचारयतः नन्दस्य वामे स्थिते मेघाच्छन्नमालोक्य स्वयं चात्यासक्ततया स्वगृहगमने असमर्थस्य केनचित् कार्यान्तरेणागतां राधां प्रति कथितमिदम् । हे राधे ! अम्बरम् आकाशं मेघैः मेदुरं स्निग्धं वर्षाभिमुखमिति यावत् । वनभुवः अरण्यभूमयः तमालद्रुमैः श्यामाः नीलवर्णाः तथा नक्तं रात्रौ उपस्थितप्रायमिति शेषः । अयञ्च कृष्णः शिशुः भीरुः भयशीलः तस्मात् त्वमेव इमं कृष्णं गृहं प्रापय नयस्व एवं इत्थात् नन्दनिदेशतः नन्दाज्ञया प्रत्यध्वकुञ्जद्रुमम् अध्वनि यः कुञ्जद्रुमः कुञ्जवृक्षः लतादिपरिवृतवृक्षः तत्र तत्र गमनात् इति भावः । तं प्रति चलितयोः प्रस्थितयोः—राधामाधवयोः यमुनाकूले रहःकेलयः एकान्तक्रीडाः जयन्ति सर्वोत्कर्षेण वर्तन्ते इत्यन्वयः । केचित्तु नन्दनिदेशतः ...

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेतम्
एतं करोति जयदेवकविः प्रबन्धम् ॥ २ ॥

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ॥ ३ ॥

[illegible] कृत्वाः देवताः उपदेशेन [illegible] । [illegible] ॥ १ ॥ [illegible] ।

अथ ग्रन्थप्रतिपाद्यवासुदेवरतिकथाकीर्तनं प्रतिजानीते वाग्देवतेति । वाग्देवतायाः सरस्वत्याः चरितेन [illegible] चित्रितं [illegible] विविधविद्याविशारद [illegible] पद्मावत्याः [illegible] चरणचारणेन [illegible] चक्रवर्ती [illegible] इति भावः । विशेषणद्वयेन [illegible] । जयदेवकविः श्रीवासुदेवस्य [illegible] तस्य कथा कीर्तनं तत्सहितम् एतं प्रबन्धं ग्रन्थं करोति । केचित्तु पद्मावत्याः [illegible] चरणचारणचक्रवर्ती [illegible] इति भावः । [illegible] ॥ २ ॥

एतदेव [illegible] यदीति । यदि हरिस्मरणे [illegible] मनः सरसं [illegible] तथा विलासकलासु रतिप्रसङ्गेषु कुतूहलं कौतुकम् [illegible] तदा मधुराः [illegible] मनोहराः [illegible] कोमलाः [illegible] कान्ताः [illegible] पदानां [illegible] आवलयः पङ्क्तयः यस्यां तादृशीं

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धन-
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥४

अथ प्रथमप्रबन्धः ।

मालवरागेण रूपकतालेन च गीयते ।

प्रलयपयोधिजले धृतवानसि वेदम् ।
विहितवहित्रचरित्रमखेदम्

जयदेवस्य सरस्वतीं वाणीं [illegible] श्रावय स्वच । दुःखविनाशनं
इदं कृतविनाशनमाच मधीमदादिति मनसाह ॥ ३ ॥

सम्प्रति कविर्निजसन्दर्भस्य सर्वोत्कृष्टत्वं वैशिष्ट्यं सन्दर्भशुद्ध्यादि-
गुणैरर्थान्तरन्यस्यति वाच इति । उमापतिधरः तदाख्यः कविः वाचः
वाक्यानि पल्लवयति विस्तारयति तत्सन्दर्भस्य शैथिल्यं बाणाद्यनुसार-
पूर्वकता इत्यर्थः । जयदेव एव न तु अन्यः कविविशेषः शरणारोऽन्य-
[illegible] । गिरां वाचां सन्दर्भशुद्धिं विशुद्धरचनां जानीते ।
शरणः तन्नामा कविः दुरूहस्य दुर्बोधस्य सन्दर्भस्य द्रुतेः द्रुतरचनात्
सुखेन बोधनात् श्लाघ्यः प्रशंसनीयः दुर्बोधमपि यन्मां सुखेन बोध-
यतीति लोकैः श्लाघ्यते इति फलितार्थः । शृङ्गारोत्तराणि शृङ्गार-
रसप्रधानानि सन्ति उत्तमानि यानि प्रमेयाणि निबन्धाः तेषां रचनैः
कोऽपि कविः आचार्यस्य तन्नाम्नः गोवर्द्धनस्य स्पर्धी सदृश इत्यर्थः
न विश्रुतः न विख्यातः आचार्यगोवर्द्धन एव तादृशं प्रबन्धं रच-
यितुमीष्टे इति भावः । तथा क्ष्मापतिः नृपतिः धोयीकविः धोयीनामा
कविः श्रुत्वा श्रवणमात्रेण न तु अभ्यासयोगेन धरति गृह्णातीति
श्रुतिधरः [illegible] कविभिरीडितः इत्यर्थः ॥ ४ ॥

अथ कविः पूर्वोक्तोपक्रमानुसारं [illegible] प्रस-

केशव ! धृतमीनशरीर ! जय जगदीश ! हरे ! ध्रुवम् ॥१
क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे

बहुष्ववतारकीर्तनमध्ये प्रथमं दशभिः श्लोकैरावतरति प्रलयेत्यादि । हे केशव ! धृतं मीनशरीरं मत्स्यरूपं येन तत्सम्बुद्धौ त्वं विहितं कृतं वहित्रस्य अर्णवपोतस्य चरितं यस्मिन् तत् तथा अखेदम् अक्लेशं यथा तथा प्रलयपयोधिजले कल्पान्तसागराम्बुनि निमज्जन्तमिति शेषं वेदं धृतवान् रक्षितवान् अतः हे जगदीश ! हे हरे ! त्वं जय सर्वोत्कर्षेण वर्तस्व अवतारवर्णनात्मकपद्यानि मालवरागेण रूपक-तालेन च गीतानि । अत्र च मालवरागेणास्य मालवगौड इति । पाठान्तरम् । अनयोर्लक्षणं संगीतदामोदरे । यथा नितम्बिनीचुम्बित-वक्त्रपद्मः शुकद्युतिः कुण्डलवान् किरीटी सङ्गीतशालां प्रविशन् प्रदोषे मालाधरो मालवराग एषः । मतान्तरे तु मालवराग एव भैरवरागः कथ्यते । आदौ च मालवरागेन्दुस्ततो मङ्गलार्थमिष्यते । श्रीरागस्य पश्चाद्वै पञ्चमाद्यनन्तरम् । त्रिकोणचाप कर्पट एते रागाः 'प्रकी-र्तिताः ॥ रूपकं चाहु द्रुतं वर्णितम् । चत्वारिंशत्पलविरचिते सङ्गीतपारिजाते च मालवरागलक्षणं यथा

रि-धौ तु कोमलौ यत्र म-नौ तीव्रौ च मालवे ।
अनुग्रहरोहावरोहस्यात् स-रि न्यासांशयोर्मितै ॥

सा ग नि ध प ध नी ध ग म ग प म मा रि स । ध्रुवपदम् ।
स ग पा ध नी ध प ग ग ग ग म मा रि गा स
पा म मा रि रि रि रि रि री स ।
म ग म ग रि ग स रि म ग प ध नी ध प ग
प प ग ग ग ग ग म मा रि रि रि सा ध नी
ध प ग ग ग ग म मा ग मा ग पा म मा रि रि
स नी सा नी ध प ग प म मा प ग ग मा रि रि स नी स सा ॥
इति मालवः स्वरोद्धारम् ॥ १ ॥

धरणिधरणकिणचक्रगरिष्ठे ।
केशव ! धृतकच्छपरूप ! 'जय जगदीश ! हरे' ! ॥ २ ॥
वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलङ्ककलेव निमग्ना ।
केशव ! धृतशूकररूप ! 'जय जगदीश ! हरे' ! ॥ ३ ॥
तव करकमलवरे नखमद्भुतशृङ्गं
दलितहिरण्यकशिपुतनुभृङ्गम् ।
केशव ! धृतनरहरिरूप ! 'जय जगदीश ! हरे' ! ॥ ४ ॥
छलयसि विक्रमणे बलिमद्भुतवामन !
पदनखनीरजनितजनपावन !

क्षितिरिति । धृतं कच्छपस्य रूपं येन तत् सम्बुद्धौ हे केशव ! क्षितिः पृथिवी धरणधा धरणेन वहनेन यत् किणचक्रं कठिनीभूतत्वक्समूहः तेन गरिष्ठे गुरुतरे विपुलतरे अतिविशाले तव-पृष्ठे तिष्ठति यतः हे जगदीश ! हे हरे ! त्वं जय एवं सर्वत्र ॥ २ ॥

वसतीति । हे धृतशूकर रूप ! धृतं शूकरस्य वराहस्य रूपं येन तत् सम्बुद्धौ । तव दशनशिखरे दन्ताग्रे लग्ना धरणी पृथ्वी शशिनि चन्द्रे निमग्ना कलङ्ककला इव वसति । अन्यत् पूर्ववत् ॥ ३ ॥

तवेति । हे धृतनरहरिरूप ! धृतं नरहर्योः नरसिंहयोः रूपं येन तत्सम्बुद्धौ । तव करकमलवरे हस्ताम्बुजश्रेष्ठे अद्भुतं शृङ्गम् अग्रं यस्य तादृशं नखं दलिता विदारिता हिरण्यकशिपोः असुरराजस्य तनुः शरीरमेव भृङ्गः येन तथाभूतं यत् शोभते इति शेषः । कमलकेसरेण भ्रमरदलनमाश्चर्यत्वात् अद्भुतत्वमिति बोध्यम् । पुरा भगवान् नारायणः नरसिंहरूपेण हिरण्यकशिपुं नखैर्विददार इति पुराणवार्त्ता । अन्यत् पूर्ववत् ॥ ४ ॥

छलयसीति । हे धृतवामनरूप ! धृतं वामनस्य रूपं येन तत्सु-

केशव ! धृतवामनरूप ! 'जय जगदीश ! हरे' ! ॥ ५ ॥

क्षत्रियरुधिरमये जगदपगतपापं
स्नपयसि पयसि शमितभवतापम् ।
केशव ! धृतभृगुपतिरूप ! 'जय जगदीश ! हरे' ! ॥ ६ ॥

वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम् ।
केशव ! धृतरघुपतिरूप ! 'जय जगदीश ! हरे' ! ॥ ७ ॥

छलयसीति हे पदनखनीरजनितजनपावन ! पदनखात् जातेन नीरेण गङ्गाजलेन जनितं जनानां पावनं पवित्रता येन विष्णुपादोद्भवा गङ्गेति स्मरणात् अत एव हे अद्भुतवामन ! अलौकिकवामनमूर्ते ! विक्रमणे पादक्षेपेण त्रिभुवनाक्रमणे अत्र विवक्षावशात् कारकाणि भवन्तीति सामान्यशास्त्रात् करणे तृतीयाविधानेऽपि अधिकरणविवक्षया सप्तमी । बलिं दैत्यराजं छलयसि प्रतारयसि । पुरा किल भगवान् विष्णुर्वामनरूपेण त्रिपादभूमियाचनया त्रिलोकाधिपतिं बलिं प्रतार्य त्रैलोक्यम् इन्द्राय दत्तवानिति पौराणिकी गाथाऽत्रानुसन्धेया । अत एव अद्भुतेति वामनविशेषणं औपयिकमित्यलम् । अन्यत् पूर्ववत् ॥ ५ ॥

क्षत्रियेति । हे धृतभृगुपतिरूप ! धृतं भृगुपतेः परशुरामस्य रूपं येन तत्सम्बुद्धौ, क्षत्रियाणां रुधिरमये शोणितरूपे पयसि जले अपगतानि पापानि यस्य तत् अत एव शमितः भवस्य संसारस्य तापो यस्य तथाभूतं जगत् स्नपयसि । पुरा भगवान् भार्गवः पितृवधामर्षदीपितः क्षत्रियत्रिसप्तकृत्वो निहत्य तेषां रुधिरजलेन पितॄन् तर्पयामास तज्जलेन वा जनाः सम्भूताः तत्र स्नानेन पापमोचिता भवन्तीति पौराणिकी वार्त्ता । अन्यत् पूर्ववत् ॥ ६ ॥

वितरसीति । हे धृतरघुपतिरूप ! धृतं रघुपतेः रामस्य रूपं येन तत्सम्बुद्धौ, रणे दिक्पतीनाम् इन्द्रादीनां कमनीयं वाञ्छनीयं

वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशव ! धृतहलधररूप ! 'जय जगदीश ! हरे' ! ॥ ८ ॥
निन्दसि यज्ञविधेरहह ! श्रुतिजातं
सदयहृदयदर्शितपशुघातम् ।
केशव ! धृतबुद्धशरीर ! 'जय जगदीश ! हरे' ! ॥ ९ ॥
म्लेच्छनिवहनिधने कलयसि करवालं

दिक्षु दशसु रमणीयं शोभाकरं दशमुखस्य रावणस्य मौलिबलिं दशमुखमौल्युपहारं वितरसि ददासि अन्यत् पूर्ववत् । पुराकिल भगवान् रामरूपेण रावणस्य दश शिरांसि छित्वा देवान् सन्तर्पयामासेति कथात्रानुसन्धेया ॥ ७ ॥

वहसीति । हे धृतहलधररूप ! धृतं हलधरस्य बलरामस्य रूपं येन तत्सम्बुद्धौ, त्वं विशदे शुभ्रे वपुषि जलदाभं नीलम् अत एव हलस्य लाङ्गलस्य हत्या आघातात् या भीतिः तया मिलिता सङ्गता शरणागता इति भावः या यमुना तस्या भा इव भा दीप्तिर्यस्य तादृशं वसनं वस्त्रं वहसि धारयसि, बलभद्रस्य नीलाम्बरत्वात् यमुनाजलस्य च नीलवर्णत्वात् वसनस्य तथात्वेनोपमितिरिति बोध्यम् । अन्यत् पूर्ववत् ॥ ८ ॥

निन्दसीति । हे धृतबुद्धशरीर ! धृतं बुद्धस्य शरीरं येन तत्सम्बुद्धौ, अहहेति दयाद्योतकमव्ययं सदयेन हृदयेन दर्शितः पशूनां घातो यस्मिन् तथोक्तं यज्ञविधेः क्रतुविधानस्य न तु अपरांशस्य श्रुतिजातं पशुना रुद्रं यजेत [illegible]इत्यादिकं वेदवाक्यसमूहं निन्दसि यतः अहिंसाया एव परमधर्मत्वेनानुमोदितत्वादिति भावः । अन्यत् समानम् ॥ ९ ॥

म्लेच्छेति । हे धृतकल्किरूप ! धृतं कल्किरूपं येन तत्सम्बुद्धौ,

धूमकेतुमिव किमपि करालम् ।
केशव ! धृतकल्किशरीर ! 'जय जगदीश ! हरे' ! ॥ १० ॥
श्रीजयदेवकवेरिदमुदितमुदारं,
शृणु सुखदं शुभदं भवसारम् ।
केशव ! धृतदशविधरूप ! 'जय जगदीश ! हरे' ! ॥ ११ ॥

इति गीतगोविन्दे प्रथमः प्रबन्धः ।

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।

त्वं म्लेच्छानां वेदबाह्यानां दुराचाराणां जनानां तथाचार्य्य गोमांस-खादको यत्र विरुद्धं बहु भाषते । सर्वाचारविहीनश्च म्लेच्छ इत्यभि-धीयत इति; निवहाः समूहाः तेषां निधने निधनार्थं निमि-त्तार्थे सप्तमी धूमकेतुमिव औत्पातिकताराविशेषमिव किमपि अनिर्वचनीयं करालं भीषणं करवालं असिं कलयसि धारयसि । अन्यत् समानम् ॥ १० ॥

श्रीजयदेवेति हे धृतदशविधरूप ! धृतं दशविधं रूपं येन तत्-सम्बुद्धौ । हे केशव ! जगदीश ! हरे ! त्वं जय सर्वोत्कर्षेण वर्त्तस्व । हे भक्तजन ! उदारं महार्थयुक्तं सुखदं शुभदं कल्याणावहं भवस्य संसारस्य सारम् इदम् स्तवरूपं श्रीजयदेवकवेः उदितं भाषितं शृणु ॥ ११ ॥

इति गीतगोविन्दे प्रथमः प्रबन्धः ।

अथ पुनः संक्षेपेण अवतारान् वर्णयन् नमस्करोति पूर्वोक्तं भङ्ग्या आह वेदानिति । वेदान् प्रलयजलधिमध्यात् उद्धरते मीनरूपावेशवते; जगन्ति निवहते पृष्ठदेशेन वहते कच्छपरूपाय इत्यर्थः; भूगोलं भूमण्डलं उद्बिभ्रते दशनेन ऊर्द्ध्वं तोलयते वराहरूपावेशवते; दैत्यं हिरण्य-कशिपुं दारयते नखैर्विदारयते नृसिंहरूपावेशवते; बलिं दैत्यपतिं

पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ १२ ॥

अथ द्वितीयप्रबन्धः ।

गुर्जरीरागमण्ठतालाभ्यां गीयते ।

श्रितकमलाकुचमण्डल ! धृतकुण्डल ! ए
कलितललितवनमाल ! 'जय जय देव ! हरे ! ध्रुवम्' ॥१॥

छलयते प्रतारयते वामनरूपायेत्यर्थः, क्षत्राणां क्षयं क्षत्रियवंश-ध्वंसं कुर्वते भार्गवरूपायेत्यर्थः पौलस्त्यं रावणं जयते रामरूपायेत्यर्थः, हलं लाङ्गलं कलयते धारयते बलभद्ररूपायेत्यर्थः. कारुण्यं दयां पशुघातनिवारणेनेति भावः आतन्वते विस्तारयते बुद्धरूपायेत्यर्थः तथा म्लेच्छान् मूर्च्छयते नाशयते कल्किरूपायेत्यर्थः अत एव दश आकृतीः अवतारान् करोतीति तथोक्ताय कृष्णाय [illegible] भगवते वासु-देवाय तुभ्यं नमः । शार्दूलविक्रीडितं छन्दः ॥ १२ ॥

श्रितेति । इत आरभ्य सप्तसु पद्येषु सर्वाणि पदानि सम्बोध-नान्तानि । ए इति सम्बोधने सम्बोधनमव्ययम् । श्रितं धृतं कमलायाः कुचमण्डलं कुचमण्डलं येन तत्सम्बुद्धौ, धृते कुण्डले कर्णभूषणे येन तत्सम्बुद्धौ, तथा कलिता धृता ललिता सुन्दरी वनमाला येन तत्-सम्बुद्धौ, हे देव हरे ! जय जय सर्वोत्कर्षेण वर्तस्व वर्तस्व ॥ १ ॥

गुर्जरीरागनिःसारतालाभ्यां गीयते । इति पाठान्तरम् । गुर्जरी-रागलक्षणं यथा संगीतदामोदरे । श्यामा सुकेशी मलयद्रुमाणां मृदूल्ल-सत्पल्लवतल्पशाला । श्रुतेः स्वराणां दधती विभागं तन्त्रीमुखा दक्षिणगुर्जरीयम् ॥ इति । सङ्गीतपारिजाते च गुर्जरीरागलक्षणं यथा
गुर्जरी षाडवोद्ग्राहांशतारे रे न्यासकीर्तिता । न्यासग्रहांशरेषेत्या [illegible]-
सिद्ध [illegible] । [illegible] गीयते दाक्षिणात्या प्रकीर्तिता ।

म प ध ध रि म रि ग ग नि ध ध ध स ध ध ध म ध म रि ग ।
रि रि ग ग ग ग । म ध ध । म ध ध गा ध मा रि ग रि र ग ध

दिनमणिमण्डलमण्डन ! भवखण्डन ! ए
मुनिजनमानसहंस ! 'जय जय देव ! हरे' ! ॥ २ ॥
कालियविषधरगञ्जन ! जनरञ्जन ! ए
यदुकुलनलिनदिनेश ! 'जय जय देव ! हरे' ! ॥ ३ ॥
मधुमुरनरकविनाशन ! गरुडासन ! ए
सुरकुलकेलिनिदान ! 'जय जय देव ! हरे' ! ॥ ४ ॥
अमलकमलदललोचन ! भवमोचन ! ए

ध ध ध नि ध प ध प ग प पा ग मा ग रि म रि रि स ध प स स। इति दाक्षिणात्यगुर्जरीलक्षणम्। प्रथमप्रकरणम्।

दिनेति। दिनमणेः सूर्यस्य मण्डलं मण्डयति भूषयतीति तत्-सम्बुद्धौ ध्येयः सदा सवितृमण्डलमध्यवर्त्तीति स्मरणात्। भवं संसारं खण्डयति छिनत्तीति तत्सम्बुद्धौ, संसारबन्धनमोचक ! मोक्षद इत्यर्थः, तथा मुनिजनानां मानसं चित्तं मानसं सरस्तत्र चर इव तत्र हंस ! अनवरतविहारिविशेषः। अथ च तदात्म परमहंस-स्वरूप !। अन्यत् समानम् ॥ २ ॥

कालियेति। कालियं तदाख्यं विषधरं पन्नगं गञ्जयति दमयतीति तत्सम्बुद्धौ, जनान् रञ्जयति सन्तोषयतीति तत्सम्बुद्धौ तथा यदुकुलान्येव नलिनानि पद्मानि तेषां दिनेशः सूर्यः तत्सम्बुद्धौ हे यदुवंशवर्द्धन ! इत्यर्थः, अन्यत् पूर्ववत् ॥ ३ ॥

मधुरेति। मधुश्च मुरश्च नरकश्च ते मधुमुरनरकाः तेषां विनाशन ! गरुडः आसनं यस्य तत्सम्बुद्धौ, गरुडवाहन इत्यर्थः तथा सुराणां देवानां कुलं सुरकुलं तस्य केलिः आनन्दविहारः तस्य निदान ! कारण ! असुराणां विनाशेन तेषामकुतोभयत्वादिति भावः। अन्यत् समानम् ॥ ४ ॥

अमलेति। अमले मलशून्ये कमलदले इव लोचने यस्य तत्सम्बुद्धौ

त्रिभुवनभवननिधान ! जय जय देव ! हरे ! ॥ ५ ॥

जनकसुताकृतभूषण ! जितदूषण ! ए
समरशमितदशकण्ठ ! जय जय देव ! हरे ! ॥ ६ ॥

अभिनवजलधरसुन्दर ! धृतमन्दर ! ए
श्रीमुखचन्द्रचकोर ! जय जय देव ! हरे ! ॥ ७ ॥

तव चरणे प्रणता वयमिति भावय ए
कुरु कुशलं प्रणतेषु जय जय देव ! हरे ! ॥ ८ ॥

श्रीजयदेवकवेरिदं कुरुते मुदम् ए

भवस्य संसारस्य मोचन ! संसारमोचक इत्यर्थः तथा त्रिभुवनमेव भवनं गृहं तस्य निधानं निधिः सर्वाधाररूपमित्यर्थः तत्सम्बुद्धौ, अन्यत् समानम् ॥ ५ ॥

जनकेति । जनकसुतया सीतया कृतं भूषणं अलङ्कारः यस्य अथ वा जनकसुतायाः कृतं भूषणं येन तत्सम्बुद्धौ, सीताकृतालङ्कार ! अथ वा कृतसीतालङ्कार ! जितः दूषणः दण्डकारण्यचरः तदाख्यराक्षसविशेषः येन अथ वा जितं दूषणं दोषजननं कार्यं येन तत्सम्बुद्धौ दूषणजयिन् ! अत एव दोषरहित ! तथा समरे युद्धे शमितः नाशितः दशकण्ठो रावणो येन तत्सम्बुद्धौ, अन्यत् समानम् ॥ ६ ॥

अभिनवेति । अभिनवः नवोदितः यः जलधरः मेघः तद्वत् सुन्दरः तत्सम्बोधने, धृतः मन्दरः पर्वतविशेषो येन तत्सम्बोधने समुद्रमन्थनकाले मन्दरोद्धरणादिति भावः तथा श्रियाः लक्ष्म्याः मुखमेव चन्द्रः तस्य चकोरः चन्द्रिकापानचतुरः पक्षिविशेषः तत्सम्बुद्धौ, कमलामुखमधुपायीत्यर्थः, अन्यत् समानम् ॥ ७ ॥

तवेति । वयं तव चरणे प्रणता इति भावय चिन्तय अस्मान् तव भक्तान् जानीहीत्यर्थः अतः प्रणतेषु अस्मासु कुशलं कुरु, अन्यत् समानम् ॥ ८ ॥

श्रीति । श्रीजयदेवकवेः इदम् वर्णिता गीतिर्वर्णितम् मङ्गलं

मङ्गलमुज्ज्वलगीतम् 'जय जय देव ! हरे' ! ॥ ८ ॥

इति द्वितीयप्रबन्धः ।

पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेद-
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ १ ॥

अथ तृतीयप्रबन्धः ।

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ।

मङ्गलं माङ्गलिकं वचनं सुखम् आनन्दं कुरुते जनयति भक्ताना-मिति शेषः अन्यत् समानम् ॥ ८ ॥

इति श्रीगीतगोविन्दे द्वितीयप्रबन्धः ।

पद्मेति । पद्मायाः लक्ष्म्याः या पयोधरतटी स्तनपरिसरः तस्याः परिरम्भणेन आलिङ्गनेन लग्नं यत् काश्मीरं कुङ्कुमं शोभार्थं स्तनो-परि दत्तमिति भावः । तेन मुद्रितं चिह्नितम् अत एव व्यक्तः रागः रागोऽनुरागः यस्य तादृशमिव तथा खेलन् यः अनङ्गः कामः तेन यः खेदः सुरतायासः तस्मात् तेन स्वेदाम्बुपूरो घर्मजलप्रवाहो यत्र तथाभूतं मधुसूदनस्य नारायणस्य उरः वक्षः वः युष्माकं प्रियं अनु-पूरयतु विदधातु इत्यन्वयः ॥ १ ॥ वसन्ततिलकं वृत्तम् । तल्लक्षणं यथा उक्तं वसन्ततिलकं तभजा जगौ गः ।

इदं मङ्गलाचरणं प्रसङ्गमुत्थापयति वसन्त इति । कापि व्रज-चरी सखी वसन्ते काले वासन्तीकुसुमैः माधवीपुष्पैरिव सुकुमारैः सुकोमलैः अवयवैः उपलक्षिताम् इत्यर्थः विशेषणे तृतीया । कान्तारे दुर्गमे वर्त्मनि निबिडे वने इत्यर्थः भ्रमन्तीं, बहु यथा तथा विहितं

अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां राधां सरसमिदमूचे सहचरी ॥ २ ॥

वसन्तरागयतितालाभ्यां गीयते ।

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ।
विहरति हरिरिह सरसवसन्ते

तत् कथानुसारेण कुतूहलेन अथ वसन्तवर्णनमिच्छन्त्या यया ताम् अतएव अमन्दम् अधिकं कन्दर्पज्वरेण कामसन्तापेन जनिता या चिन्ता तया आकुलतया व्याकुलतया वलन्ती बाधा पीडा यस्यास्तादृशीं राधाम् इदं सरसं वचः ऊचे उक्तवती ॥ २ ॥ अत्र शिखरिणीवृत्तम् । तल्लक्षणं यथा रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।

वसन्तरागेण रूपकतालेन च गीयते । रूपकतालं यतितालेनेति पाठान्तरम् । वसन्तरागस्य लक्षणं यथा सङ्गीतदामोदरे । शिखण्डिबर्होच्चयबद्धचूडः पुष्णन् पिकं चूतलताङ्कुरैश्च । भ्रमन् मुदा मारमनोज्ञमूर्त्तिर्मत्तः स्मृतः स वसन्तरागः । अयञ्च मालवगतौ यथा । श्रीपञ्चम्याः समारभ्य यावत् शयनं हरेः । तावद् वसन्तरागस्य गानमुक्तं मनीषिभिः ॥

वसन्तरागलक्षणं यथा सङ्गीतपारिजाते उक्तम्

षड्जादिमूर्च्छने ग्रामे स-न्यौ गौरी वसन्तके ।
स रि ग म प ध नि स स नि ध प म ग स स सा ।
ग म प ध नि ध ध प म ग स सा म सा ।
स रि ग म प ध स रि ग म प ग ग रि ग स नि ध
म ध प म प म प म प म म प म ध ध प म रि
स नि ध नि स सा । इति प्रातःकालीनः ।

ललितेति । हे सखि ! ललितानां सुन्दरीणां लवङ्गलतानां परिशीलनेन संसर्गेण कोमलः सुरभिः मलयसमीरः दक्षिणाच-

नृत्यति युवतिजनेन समं सखि! विरहिजनस्य दुरन्ते ॥१॥
ध्रुवम् ।

उन्मदमदनमनोरथपथिक-
वधूजनजनितविलापे ।
अलिकुलसङ्कुलकुसुमसमूह-
निराकुलबकुलकलापे 'विहरति' ॥ २ ॥
मृगमदसौरभरभसवशंवद-
नवदलमालतमाले ।
युवजनहृदयविदारणमनसिज-
नखरुचिकिंशुकजाले 'विहरति' ॥ ३ ॥

वायुः येन तादृशे, मधुकराणां भ्रमराणां निकरैः पुञ्जैः करम्बिताः मिश्रिता ये कोकिलाः तैः कूजितं कूजनपूरितं कुञ्जकुटीरं लताहि-मण्डपं कुञ्जगृहं यस्मिन् तथाभूते तथा विरहिजनस्य दुरन्ते दुःसहे इह सरसवसन्ते रसः प्रेमानुरागः तद् युक्ते रसो-द्दीपके वसन्ते हरिः कृष्णः युवतिजनेन समं सह विहरति क्रीडति नृत्यति च ॥ १ ॥

उन्मदेति । उन्मदा उद्गता मदनमनोरथाः कामाभिलाषाः येषां तादृशाः ये पथिकानां प्रवासिनां वधूजनाः तैः जनितः विलापः यत्र तस्मिन्, तथा अलिकुलैः भ्रमरवृन्दैः संकुला ये कुसुमसमूहाः तैः निरा-कुलाः निःशेषेण व्याकुलाः व्याप्ता बकुलकलापाः यस्मिन् तथाभूते वसन्ते इति शेषः अन्यत् यथापूर्वम् ॥ २ ॥

मृगमदेति । मृगमदस्य कस्तूरिकायाः यः रभस वेगः अति-शय इत्यर्थः रभसो वेगहर्षौत्सुक्यादरः तस्य वशंवदा आयत्ता अनु-कारिण्योऽपि यावत् नवाः नूतना दलमालाः पत्रसमूहाः येषां तादृशाः

मदनमहीपतिकनकदण्ड-
रुचिकेशरकुसुमविकासे ।
मिलितशिलीमुखपाटलिपटल-
कृतस्मरतूणविलासे 'विहरति' ॥ ४ ॥
विगलितलज्जितजगदवलोकन-
तरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृति-
केतकिदन्तुरिताशे 'विहरति' ॥ ५ ॥

लताना: दलभेदा यस्मिन् तथाभूते, तथा युवतीनां हृदयानां स्फुटन-
विदारणं यतः पौरुषं वनविशेषः चापक्षमौ नखाः तत्र रचिते
कामिनीव रचितेऽस्मिन् तादृशे किंशुकानां पलाशानां जालं समूहो
यस्मिन् तादृशे वसन्ते इत्यादि विशेषणम् अन्यत् पूर्ववत् ॥ ३ ॥

मदनेति । मदनस्य महीपतेः राज्ञः यः कनकदण्डः सुवर्णयष्टिः
राज्ञः छत्रधरस्य इति भावः । तस्य रुचिरिव रुचिर्यस्य तादृशः
केशरकुसुमानां नागकेशरपुष्पाणां विकासो यस्मिन् तथोक्ते तथा
मिलिताः शिलीमुखा भ्रमरा येषु तादृशैः पाटलिपटलैः पाटला-
कुसुमैः कृतः स्मरस्य कामस्य तूणस्य विलासः शोभितं यस्मिन् तथा-
भूते वसन्ते इत्यादि विशेषणम् । अन्यत् समानम् ॥ ४ ॥

विगलितेति । विगलितं विगतं लज्जितं लज्जा भावे क्तः ।
येषां तादृशानां जगतां लोकानां अवलोकनात् सम्भ्रमदर्शनात्
विलासैः, तरुणं नवस्फुटमानात् करुणोद्भवेन दर्शनेन तरुणैः नवैः
करुणैः तदाख्यतरुभिः कृतः हासः पुष्पविकास इव इति भावः । यत्र
तादृशे, तथा विरहिणां निकृन्तनानि संहारकाणि कुन्तस्य अस्त्रविशे-
षस्य मुखाकाराकृतिरिव आकृतिर्येषां तादृशैः केतकिभिः केतकीपु-

माधविकापरिमलललिते
नवमालतिजातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि
तरुणाकारणबन्धौ 'विहरति' ॥ ६ ॥
स्फुरदतिमुक्तलतापरि-
रम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसर
परिगतयमुनाजलपूते 'विहरति' ॥ ७ ॥
श्रीजयदेवभणितमिद-
मुदयतु हरिचरणस्मृतिसारम् ।

कुसुमैः दन्तुरिता आम्रा आशाः दिशः यत्र तादृशे वरवसन्ते इत्यत्र विशेषणम् अन्यत् समानम् ॥ ५ ॥

माधविकेति । माधविकायाः परिमलेन सौरभेण ललिते मनोहरे ललितं त्रिषु सुन्दरमित्यमरः । नवाभिः अभिनवविकसिताभिः मालतीभिः जातिभिश्च सुगन्धौ, अत एव मुनिमनसां तापसचेतसामपि मोहनकारिणि मोहजनके तथा तरुणानां यूनाम् अविरहिणामिति भावः । अकारणबन्धौ हेतुं विना हितकारिणि ईदृशे वरवसन्ते इत्यत्र पूर्वोक्तम् विशेषणम् । अन्यत् समानम् ॥ ६ ॥

स्फुरदिति । स्फुरन्तीनां विकसन्तीनाम् अतिमुक्तलतानां माधवीलतानां परिरम्भणेन आलिङ्गनेन मुकुलिताः सञ्जातमुकुलाः अतएव पुलकिता रोमाञ्चिता इव चूताः रसालाः यत्र तादृशे तथा परिसरेषु प्रान्तदेशेषु परिगता वर्त्तमाना या यमुना तस्याः जलैः पूते पवित्रीकृते वृन्दावनविपिने वृन्दावनाख्यकानने वरवसन्ते हरिः क्रीडनोत्सवेन [illegible] ॥ ७ ॥

श्रीति । श्रीजयदेवेन भणितं श्रीजयदेवकविना उक्तं इदं ऋतुवर्णनं

सरसवसन्तसमयवनवर्णन-

मनुगतमदनविकारं 'विहरति' ॥ ८ ॥

इति श्रीगीतगोविन्दे तृतीयः प्रबन्धः ।

दरविगलितमल्लीवल्लिचञ्चत्पराग-

प्रकटितपटवासैर्वासयन् काननानि ।

इह हि दहति चेतः केतकीगन्धबन्धुः

प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ ९ ॥

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-

क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।

मदनस्य कामस्य विकारो येन तत् कामोद्दीपकमित्यर्थः; हरिचरणयोः स्मृतिः स्मरणमेव सारः परमार्थो यस्य तथाभूतं चरितं यः सरसवसन्त-समयवनवर्णनम् उदयतु उदयं वृद्धिं प्राप्नोतु । उदयति इति पाठा-न्तरं न युक्ततरम् इति विवेच्यम् ॥ ८ ॥

इति श्रीगीतगोविन्दे तृतीयः प्रबन्धः ।

अथ वसन्तवायुं वर्णयति दरेति । इह वसन्ते केतकीनां गन्धेन सौरभातिशयेन बन्धुः मोदकारकः तथा प्रसरन् सुवजनान् प्रति-धावन् यः असमबाणः पञ्चबाणः काम इत्यर्थः तस्य प्राणवत् प्राणप्रद-मारुतमिव इत्यर्थः अत्र मारुतस्य कामोद्दीपकत्वादिति भावः । गन्धवाहः वायुः दरविदलितानां ईषद्विकसितानां मल्लीनां या वल्ल्यः लताः तासां पराणाः कौसुमरजांसीव ये प्रकटिताः स्फुटीकृताः पटवासाः सुगन्धचूर्णविशेषाः तैः काननानि वासयन् सुरभीकुर्वन् सन् चेतः विर-हिणामिति शेषः दहति हि सन्तापयत्येव हिशब्दोऽवधारणे [illegible] [illegible] । [illegible] [illegible] । इति तद्वचनात् ॥ ९ ॥

सम्प्रति वसन्तवासराणां पथिकजनदुःसहत्वं वर्णयति उन्मील-दिति । पथिकैः विरहिभिरित्यर्थः ध्यानं कान्तायाः चिन्तनं तत्

नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ १० ॥

अनेकनारीपरिरम्भसम्भ्रम-
स्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ
सखी समक्षं पुनराह राधिकाम् ॥ ११ ॥

अथ ध्यानम् अभिनिवेशः तस्य क्षणे प्राप्तः अनुभूतः प्राणसमायाः प्राणतुल्यायाः प्रियायाः समागमरसेन सङ्गमसुखेन उल्लासः आनन्दः तैः तथाभूतैः पथिकैः कान्तारेषु प्रान्तरेषु मधुमत्तेषु मकरन्दमत्तेषु मधुपैः भ्रमरैः आधूताः कम्पिताः ये चूताङ्कुराः आम्रमुकुलानि तेषु क्रीडितं कोकिलानां कलगीतकलकलैः सूक्ष्ममधुरास्फुटध्वनिकलनैः कर्णजीर्णैः पट्टूताः कर्णज्वराः श्रोत्रपीडा येषु तथोक्ताः अमी वासराः वासन्तादिवसाः कथं कथमपि अतिकष्टेनेत्यर्थः नीयन्ते अतिवाह्यन्ते इत्यन्वयः । इत्यन्तम् । शार्दूलविक्रीडितम् ॥ १० ॥

अनेकेति । असौ पूर्वोक्ता सखी आरात् दूरदेशे स्थितमिति शेषः आरात् दूरसमीपयोरित्यमरः अनेकासां बह्वीनां नारीणां परिरम्भे आलिङ्गने यः सम्भ्रम आवेगः तेन स्फुरन् राजन् मनोहारी यः विलासः केलिः तत्र लालसः सतृष्णः तं मुरारिं कृष्णं समक्षम् अक्ष्णोः समीपे समक्षम् इव अक्ष्णोऽग्राभ्यां प्रत्यक्षोपदर्शितमित्यर्थः उपदर्शयन्ती सखी पुनः राधिकाम् आह वर्तमाननिर्देशः भूतबोधकः । वंशस्थबिलम् । वदन्ति वंशस्थबिलं जतौ जरौ इति लक्षणात् ॥ ११ ॥

रामकरीरागेण रूपकतालेन च गीयते रूपकतालेनात्र यतितालेन इत्यपि पाठान्तरम् । सङ्गीतदामोदरे रामकरीध्यानं यथा । कर्णोत्पला- लाकृतकण्ठा च नीलं निचोलं दधती वहन्ती । कान्तोपदिष्टाप्यकृ- शिवापि [illegible] रामकरी प्रदिष्टा ॥ इति । संगीतपारिजाते च

अथ चतुर्थः प्रबन्धः।

रामकरीरागयतितालाभ्यां गीयते।

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली
केलिचलन्मणिकुण्डलमण्डितगण्ड-
युगस्मितशाली हरिरिह मुग्धवधूनिकरे
विलासिनि विलसति केलिपरे ॥ ध्रुवम् ॥ १ ॥

रामकरीरागलक्षणं यथा। रि-कोमला ग तीव्रा वा म तीव्रतरसंयुता। ध कोमला नि-तीव्रा च ख्याता रामकरीति सा। आरोहे म-नि-वर्ज्या स्यात् षाड्वा पौरवमूर्च्छना॥

स म रि ग प म मा रि स स रि ग प म प प ध्.स ग
रि स स नि ध प धा प मा म म प म म मा रि स स
नि ध प म प ध स स रि स रि म प प म म मा रि
स स रि म सा ध ध प म प प म प म मा रि सा
स रि रि स रि म स रि म प म ध ध स म रि स
स नि ध प धा प म म रि स। स रि स रिस सा॥

इति रामकरी। ताल-आड़ाठेका।

चन्दनेति। हे विलासिनि विरहवतीके! केलिना क्रीड़ारसेन चलद्भ्यां मणिकुण्डलाभ्यां रत्ननिर्मितकर्णभूषणाभ्यां मण्डितम् अल-ङ्कृतं गण्डयुगं कपोलयुगलं यस्य सः तथा स्मितेन मधुरहासेन भासते शोभते इति स्मितशाली, चन्दनेन चर्चितम् अनुलिप्तं नीलं कले-वरं शरीरं यस्य सः तथा पीतं वसनं यस्य तथोक्तः वनमाली वन-कुसुममालाधरः हरिः इह अस्मिन् केलिपरे क्रीड़ासक्ते मुग्धवधूनि-करे सुन्दरी समूहे विलसति विहरति। विलासिनीतिपदं मुग्ध-वधूनिकरे इत्यस्य विशेषणत्वेनापि व्याख्यातं इति बोध्यं सुधीः सुन्दर-[illegible] ॥ १ ॥

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि ! मूर्त्तिमानिव मधौ मुग्धो हरिः क्रीडति॥९॥
अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।
किञ्चित् स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूःकुहूरिति कलोत्तालाः पिकानां गिरः॥१०॥

विश्वेषामिति । हे सखि ! अनुरञ्जनेन सन्तोषविधानेन विश्वेषां जगताम् आनन्दं जनयन् मुग्धः सुन्दरः मनोहरमूर्त्तिः हरिः मधौ वसन्ते इन्दीवराणां नीलोत्पलानां श्रेण्य इव श्यामलानि कोमलानि सुकुमाराणि च तैः अङ्गैः अनङ्गोत्सवं कामोल्लासं जनयन् वर्द्धयन् व्रजसुन्दरीभिः अभितः समन्ततः स्वच्छन्दं यथा तथा प्रत्यङ्गं प्रत्यवयवं आलिङ्गितः आश्लिष्टः सन् मूर्त्तिमान् देहवान् शृङ्गारः आदिरस इव क्रीडति शृङ्गाररसस्यापि श्यामवर्णत्वमुक्तं यथा श्यामो भवति शृङ्गारः सितो हास्यः प्रकीर्त्तित इति प्रथमोक्तं विशेषणद्वयं शृङ्गार इति पक्षेऽपि सङ्गच्छते इति बोध्यम् ॥ ९ ॥ शार्दूलविक्रीडितम् वृत्तम् ।

अद्येति । अद्य वसन्ते इदानीं श्रीखण्डशैलस्य मलयाचलस्य अनिलः वायुः उत्सङ्गे मध्यभागे क्रोडे वसन्तः ये भुजङ्गाः सर्पाः तेषां कवलेन ग्रासेन यः क्लेशः तस्मादिव भुजङ्गानां वायुभोजित्वं प्रसिद्धम् । भुजङ्गकवलेन विषज्वालाजर्जरीभूतत्वादिति भावः । प्रालेयेषु हिमेषु प्लवनेच्छया अवगाहनवाञ्छया विषज्वालोपशमनार्थमिति भावः ईशस्य गिरिशस्य अचलः हिमाचलं अनुसरति गच्छति वसन्ते वायोः दक्षिण-दिग्वर्त्तिनो मलयाचलात् उत्तरे गमनात् उत्तरे च हिमाचल

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितस्मितमनोहारी हरिः पातु वः॥ ११॥

इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः।

स्थितेरिवसततमेषा। किञ्च स्निग्धानि कोमलानि रसालानां आम्राणां कोटिषु शिखरेषु यानि मुकुलानि तानि आलोक्य दृष्ट्वा हर्षोदयात् आनन्दोदयात् पिकानां कोकिलानां कुहूः कुहूरिति एवं उच्चमधुरा उत्ताला अस्फुटाः गिरः वाचः उज्जृम्भन्ते उद्गच्छन्ति॥ १०॥ शार्दूलविक्रीडितम् वृत्तम्।

सम्प्रति सर्गसमाप्तौ कथोपक्रमसङ्गत्या भक्तान् आशिषा संहरन्नाह रासेति। प्रेमान्धया प्रेम्णा अनुरागेण अन्धया हतज्ञानया इत्यर्थः राधया कर्त्र्या रासोल्लासभरेण रासोत्सवानन्दातिशयेन हेतुना विभ्रमभृतां विलासिनीनाम् आभीरवामभ्रुवां गोपाङ्गनानां मध्ये अभ्यर्णं समीपे निर्भरं गाढं यथा तथा उरः हरेरिति शेषः। परिरभ्य आलिङ्ग्य त्वद्वदनं तव मुखं साधु सुधामयं पीयूषपूर्णमिति गीतस्तुतिव्याजात् गानप्रबन्धच्छलेन व्याहृत्य उक्त्वा उद्भटम् अतिमात्रं चुम्बितः अत एव स्मितेन मृदुमन्दहासेन मनोहारी हरिः वः युष्मान् भक्तानिति भावः। पातु रक्षतु इत्यन्वयः॥ ११॥ शार्दूलविक्रीडितम् वृत्तम्।

इति श्रीगीतगोविन्दे [illegible] सामोददामोदरो नाम प्रथमः सर्गः॥

द्वितीयः सर्गः ।

अक्लेशकेशवः ।

विहरति वने राधा साधारणप्रणये हरौ-
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम् ॥ १ ॥

अथ पञ्चमः प्रबन्धः ।

गुर्जरीरागेण रूपकतालेन च गीयते ।

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशं
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ।

विहरतीति । हरौ कृष्णे साधारणः अपरनारीसमानः प्रणयो यस्य तथाभूते वने विहरति अपरनारीषु यादृशं प्रेम राधायामपि तादृशमेव वितन्वति सति राधा विगलितनिजोत्कर्षात् निजोत्कर्षा-गमनादित्यर्थः हेतोः ईर्ष्यावशेन असहिष्णुतया दीना दुःखिता अपि अन्यतः अन्यस्मिन् क्वचिदपि गुञ्जन्तः ये मधुव्रताः भ्रमराः तेषां मण्डलीभिः श्रेणीभिः मुखरं ध्वनितं शिखरम् अग्रभागः यस्य तादृशे लताकुञ्जे लीना तिरोहिता सती रहः एकान्ते सखीम् उवाच । हरिणीवृत्तम् । न समरसलागः षड्वेदैर्हयैर्हरिणी मता । इति तल्लक्षणात् ॥ १ ॥

गुर्जरीरागेण रूपकताले न च गीयते । रूपकताले इत्यत्र यतितालेनेति पाठान्तरम् ।

सञ्चरदिति । हे सखि ! मम मनः कर्तृ सञ्चरता उद्गच्छता अधर-सुधया मधुरेण ध्वनिना स्वरेण मुखरितः पूरितः मोहनः मनोहरः वंशो वेणुवाद्यविशेषो येन तादृशं चलितः दृगञ्चलः अपाङ्गदर्शनं

"रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासं" 'ध्रुवम्' ॥ १ ॥

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशं
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशं "रासे" ॥२॥

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम् ।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं "रासे" ॥३॥

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रम् ।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रं "रासे" ४

यस्य सः कटाक्षदर्शितहर्षः, चतुरचेष्टाभिः शेखरो यस्य सः तथा कपोलयोर्विलोलौ चपलौ चलौ कुण्डले यस्य सः ततश्चाद्यानां पदानां कर्मधारयः । तम् इह रासे विहितः कृतः विलासो येन तादृशं तथा कृतः परिहासो येन तथोक्तं हरिं स्मरति ॥ १ ॥

चन्द्रकेति । चन्द्रकेण शिखिपत्रचन्द्रेण चारुणा मनोज्ञेन मयूरशिखण्डकानां शिखिपुच्छानां मण्डलेन वलयितः संवलितः केशो यस्य तादृशं तथा च प्रचुरेण विस्तीर्णेन पुरन्दरधनुषा शक्रधनुषा अनुरञ्जितः भूषितः मेदुरः स्निग्धः यः मुदिरः मेघः तद्वत् सुन्दरः वेशः यस्य तथाभूतं रासे हरिमित्यादि योज्यम् ॥ २ ॥

गोपेति । गोपकदम्बस्य आभीरवृन्दस्य याः नितम्बवत्यः प्रशस्तनितम्बाः कामिन्यः तासां मुखचुम्बने लम्भितः जनितः लोभः यस्य तं बन्धुजीववत् मधुरः अधरः पल्लव इव यस्य तथोक्तं तथा उल्लसिता विकाशिता स्मितेन ईषद्धास्येन शोभा यस्य तादृशम् अन्यत् पूर्ववत् ॥ ३ ॥

विपुलेति । विपुलाः प्रभूताः पुलकाः रोमोद्गमाः ययोस्ताभ्यां भुजपल्लवाभ्यां वलयितं व्यालिङ्गितं वल्लवयुवतीनां गोपाङ्गनानां सहस्रं येन तथोक्तं तथा करचरणोरसि करपदवक्षसि स्थितानामिति

जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटम् ।

पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं "रासे" ॥ ५ ॥

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।

पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं "रासे" ॥ ६ ॥

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम् ।

मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तं 'रासे' ॥ ७

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।

---

* श्रेणः मणिगणभूषणानां रत्नालङ्काराणां किरणेन विभिन्नं निराकृतं तमिस्रम् अन्धकारः येन तथाभूतम् । अन्यत् पूर्ववत् ॥ ४ ॥

जलदेति । जलदानां मेघानां पटले समूहे चलन् यः इन्दुः चन्द्रः तस्य विनिन्दकं चन्दनतिलकं ललाटे यस्य तं तथा पीनयोः विशालयोः पयोधरयोः स्तनयोः यः परिसरः पर्यन्तभागः तस्य मर्दने निर्दयं हृदयकपाटं कपाटवत् विस्तीर्णं हृदयं यस्य तादृशम् । अन्यत् समम् ॥ ५ ॥

मणिमयेति । मणिमयाभ्यां रत्ननिर्मिताभ्यां मकरमनोहराभ्यां मकराकृत्या मनोहराभ्यां कुण्डलाभ्यां मण्डितौ शोभितौ गण्डौ यस्य तम् उदारं महानुभावं पीतवसनं पीताम्बरं तथा अनुगताः मुनयः मनुजाः मानवाः सुराः असुराश्च वराः श्रेष्ठाः परिवाराः यस्य तथाभूतम् । अन्यत् समानम् ॥ ६ ॥

विशदेति । विशदकदम्बतले निर्मले नीपतरुतले मिलितं स्थितं कलिकलुषभयं शमयन्तं कलिजनितपापतापहरमित्यर्थः तथा किमपि अनिर्वचनीयं यथा तथा तरङ्गती विलसन्ती अनङ्गदृक् कामदृष्टिः यस्मिन् तादृशेन मनसा मामपि रमयन्तं हृदयानन्दतया यथा तथ विहरन्तमित्यर्थः । अन्यत् समानम् ॥ ७ ॥*

श्रीति । श्रीजयदेवेन भणितम् उक्तम् अतिसुन्दरं मोहनं

रिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम् 'रासे' ॥८॥

इति पञ्चमः प्रबन्धः ।

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परीतोषं दोषं विमुञ्चति दूरतः ।
युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥ १ ॥

अथ षष्ठः प्रबन्धः ।

मालवरागेण एकतालीतालेन च गीयते ।

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तं
चकितविलोकितसकलदिशा रतिरभसभरेण हसन्तम् ।

मनोहरं मधुरिपोः श्रीकृष्णस्य रूपं सम्प्रति पुण्यवतां भक्तानां हरि-चरणयोः स्मरणं प्रति अनुरूपम् अनुकूलं भवतु इति शेषः । अन्यत् समानम् ॥ ८ ॥

इति गीतगोविन्दे पञ्चमः प्रबन्धः ।

गणयतीति । हे सखि ! कृष्णे युवतिषु गोपाङ्गनासु वलन्ती सञ्चरन्ती तृष्णा रिरंसा यस्य तादृशे अत एव मां विना विहारिणि रममाणे अपीत्यर्थः मम वामम् अवाध्यं मनः पुनरपि कामं कृष्णाभिलाषं करोति तथा हि गुणग्रामं कृष्णस्य गुणसमूहं गणयति विचारयति, भ्रमादपि भ्रामं विभ्रमं न ईहते न विचारतीत्यर्थः परीतोषं तत्स्मरणेन इति शेषः विपुलानन्दं वहति तथा दोषं तद्-बह्वङ्गनिरतमपराधं दूरतः मुञ्चति परिहरति न गणयतीत्यर्थः किं करोमि नाहमन्या गतिरिति भावः ॥ १ ॥ हरिणीवृत्तम् ।

मालवरागेण एकतालीतालेन च गीयते ।

निभृतनिकुञ्जगृहमित्यादि । हे सखि ! निभृतं निर्जनं यत् निकुञ्ज-गृहं लतादिवेष्टितरम्यं स्थानं गतया, मदने कामे वा मनोरथः

"सखि हे ! केशिमथनमुदारं रमय मया सह

मदनमनोरथभावितया सविकारं" ध्रुवम् ॥ १ ॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।

मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं 'सखि हे' ॥

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् ।

कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानं 'सखि हे' ॥३

अभिलाषः कामविषयिणीच्छा इत्यर्थः तस्मिन् भावः आवेशः अस्या जातः इति तथोक्ता अस्य जाते इत प्रत्ययः । तया तथा चकितं यथा तथा विलोकिता दृष्टा सकला दिक् यया तादृश्या मया सह निशि रात्रौ एकान्ते निलीय आत्मानं संगोप्य वसन्तं स्थितं, रतौ शृङ्गारे यः रभसः आवेशः तस्य भरेण आतिशय्येन सविकारं कामचेष्टया भावान्तरगतम् उदारं मधुरं यथा तथा हसन्तं केशिमथनं केशिनामासुरसूदनं कृष्णं रमय रतिं कारय ॥ १ ॥

प्रथमेति । प्रथमः आद्यः अभूतपूर्व इत्यर्थः । यः स[illegible]मः तेन लज्जितया तथा मृदु मधुरं स्मितं यस्मिन् तादृशं भाषितं वचनं यस्याः तथाभूतया मयेति शेषः पटूनि निपुणानि मनोहरणसमर्थानीत्यर्थः यानि चाटूनां प्रियवाक्यानां शतानि तैः अनुकूलम् अनुकूलयन्तं कृतापराधं मां क्षमस्वेति वादिनमित्यर्थः तथा शिथिलीकृतं श्लथितं जघनात् दुकूलं वसनं येन तादृशं कृष्णमिति शेषः । अन्यत् समानम् ॥ २ ॥

किसलयेति । किसलयशयने पल्लवशय्यायां निवेशितया शायितया तथा कृतं परिरम्भणम् आलिङ्गनम् चुम्बनञ्च यया तथाभूतया मयेति शेषः । चिरं बहुक्षणं ममैव उरसि वक्षसि शयानं तथा परिरभ्य आलिङ्ग्य कृतम् अधरपानं येन तथोक्तं कृष्णमिति शेषः । अन्यत् समानम् ॥ ३ ॥

अलसनिमीलितलोचनया पुलकावलिललितकपोलम्।
श्रमजलशिथिलकलेवरया वरमदनमदादतिलोलम् 'सखि हे' ॥४॥
कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम्।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् 'सखि हे' ॥५॥
चरणरणितमणिनूपुरया परिपूरितसुरतवितानम्।
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम् 'सखि हे' ॥६॥

अलसेति। अलसेन सुरतश्रमजनितेन निमीलिते विलोचने यस्याः तया तथा श्रमजलेन स्वेदाम्बुना सिक्तं कलेवरं यस्यास्तादृश्या मयेति शेषः। पुलकानां रोमहर्षाणाम् आवल्या श्रेण्या चुम्बनादिति भावः। ललितौ कपोलौ गण्डौ यस्य तं तथा वरमदनेन अतिप्रवृद्धकामेन यो मदः विकारविशेषः तस्मात् अतिलोलं मां प्रति अतिसतृष्णमित्यर्थः कृष्णमिति शेषः। अन्यत् पूर्ववत् ॥ ४ ॥

कोकिलेति। कोकिलस्य कलः मधुरः यः रवः तद्वत् कूजितं भाषितं यस्याः मधुरभाषिण्या इत्यर्थः, तथा श्लथानि निधुवनलीलया विच्युतानि कुसुमानि येभ्यः तादृशाः आकुलाः सम्भ्रमरागाधिक्यात् इतस्ततो विक्षिप्ताः कुन्तलाः केशाः यस्याः तथाभूतया मयेति शेषः, जितः मनसिजतन्त्रस्य कामशास्त्रस्य विचारः येन तं कामशास्त्रविचारे सर्वजयिनमित्यर्थः, तथा नखैः लिखितौ अङ्कितौ घनयोः मांसलयोः स्तनयोः भारौ विस्तारौ येन तथोक्तं कृष्णमिति शेषः। अन्यत् समानम् ॥ ५ ॥

चरणेति। चरणयोः पादयोः रणितौ मणिनूपुरौ यस्याः तया तथा मुखराः शब्दायमाना नितम्बचालनादिति भावः। तथा विशृङ्खला अयथास्थिता मेखला रशना यस्याः तया मयेति शेष, परिपूरितम् अशेषतः कृतः सुरतवितानः निधुवनव्यापारः येन तं तथा सकचग्रहं केशग्रहणपूर्वकं चुम्बनदानं यस्य तथोक्तं कृष्णमिति। अन्यत् पूर्ववत् ॥ ६ ॥

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् 'सखि हे' ७

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कण्ठितराधिकया कथितं वितनोतु सलीलम् 'सखि हे' ८

इति षष्ठः प्रबन्धः ।

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्य विलज्जितस्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥ १ ॥

रतीति । रतिसुखसमये यः रसः चेतसो द्रवीभावः, तेन अलसया निश्चेष्टया अतएव निःसहम् अपाटवं यथा तथा निपतिता तनुर्लता इव यस्यास्तथाभूतया मयेति योज्यं दरमुकुलिते ईषत् मुकुलिते नयने सरोजे इव यस्य तादृशं उदितः प्रवृद्धः मनोजः कामो यस्य तथाभूतं मधुसूदनम् । अन्यत् यथा पूर्वमूहनीयम् ।

श्रीति । श्रीजयदेवेन भणितम् इदम् उत्कण्ठितया कृष्णप्राप्त्युत्सुकया राधिकया कथितं सलीलं सविलासम् अतिशयम् अतिमात्रं मधुरिपोः कृष्णस्य यत् निधुवनं सुरतं तस्य शीलं आचरणं सुखं भक्तानामिति शेषः, वितनोतु विदधातु । अन्यत् पूर्ववत् ॥ ८ ॥

इति श्रीगीतगोविन्दे षष्ठः प्रबन्धः ।

हस्तेति । इदानीं सख्यानीताया राधाया गोपाङ्गनावृतं कृष्णं दृष्ट्वा [illegible] । हे सखि ! कानने व्रजसुन्दरीगणवृतं हस्तस्रस्तः क्रीडया अनृजवः अवक्राः विद्यन्ते यासां तादृशः या बल्लव्यः गोपाङ्गनाः तासां वृन्दैः समूहैः उत्सारी [illegible] यस्मिन् तत् [illegible] यथा तथा [illegible] । [illegible] स्वेदार्द्रे [illegible] । अतएव मामुद्वीक्ष्य विलज्जितया विशेषलज्जा-

दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकाशः कासारोपवनपवनोऽपि व्यथयति।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि! शिखरिणीयं सुखयति॥ २॥

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजामूलार्धदृष्टस्तनम्।
गोपीनां निभृतं निरीक्ष्य दयिताकाङ्क्षिरं चिन्तयन्
अन्तर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः॥ ३॥

इति अक्लेशकेशवो नाम द्वितीयः सर्गः।

युक्तया स्निग्धया सुधावन्मधुरध्वनिनेत्यर्थः, मुग्धं मनोहरम् आननं मुखं यस्य तम्, आतिशय्येन मधुरभाषिणेनेति भावः। आर्द्रं गद्गदस्वनं यस्य तथाभूतं तथा कुचाभ्यां सह विकटः विकासयुक्तः मोहनवेणुर्यस्य तथोक्तं गोविन्दं पश्यामि स्पृशामि आनन्दातिशय-मनुभवामि च॥ १॥ शार्दूलविक्रीडितम् वृत्तम्।

विरहव्याकुलतां दर्शयति दुरेति। हे सखि! सम्प्रति दुरालोकः दुर्दर्शः उद्दीपकत्वादिति भावः। स्तोकस्तबकः अल्पपुष्पगुच्छः यस्याः तादृशी नवका अभिनवा अशोकलतिका तस्याः विकाशः तथा कासारयुक्तम् उपवनं कासारोपवनं मध्यपदलोपी समासः सरोवरसहितमुपवन-मित्यर्थः, तस्य पवनोऽपि व्यथयति तापयति कामोद्दीपनादिति भावः। तथा भ्राम्यन्तीनां भृङ्गीनां रणितैः गुञ्जितैः रमणीया मनोहारिणी शिखरिणी पर्वतोपभागा इयं चूतानां आम्राणां मुकुलप्रसूतिः अपि न सुखयति अपि तु तापयत्येवेत्यर्थः उद्दीपकत्वादिति भावः॥ २॥ शिखरिणीवृत्तम्।

साकूतेति। गोपीनां साकूतं साभिप्रायं स्मितं मन्दहासो यस्मिन् तत्, आकुलाकुलम् अत्यन्तं यथा तथा गलन्तः स्खलन्तः

अथ तृतीयः सर्गः।

मुग्ध मधुसूदनः।

कंसारिरपि संसारवासनाबद्धशृङ्खलाम्।

राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥ १ ॥

इतस्ततस्तामनुसृत्य राधिकामनङ्गबाणव्रणखिन्नमानसः।

कृतानुतापः स कलिन्दनन्दिनीतटान्तकुञ्जे विषसाद माधवः॥२

अथ सप्तमः प्रबन्धः।

धम्मिल्लाः केशवेषा यस्मिन् तत् धम्मिल्लाः संयताः कचा इत्यमरः। चञ्चलिता तरङ्गिता कुटिलिता भ्रूवल्ली यस्मिन् तत् अपाङ्गं सव्याजं यथा तथा दर्शितं भुजामूलं बाहुमूलं यस्मिन् तथा वक्षः हृष्टः सन् यत्र तत् यथा तथा निभृतं गोपवधूजनं निरीक्ष्य अतः मनसि मनोहरं यथा तथा स्मितयन् तथा दयितं प्रियं ताभिः सह सुरतव्यापारमिलनं, आकाङ्क्षति अभिकमतीति तथोक्तः नवः नवीन केशवः सः युष्माकं चिरं क्षेमं करोतु इत्यन्वयः ॥ २ ॥ शार्दूलविक्रीडितम्।

इति श्रीगीतगोविन्दे महाकाव्ये अक्लेशकेशवोनाम द्वितीयः सर्गः।

वक्ष्यति कृष्णस्यापि विरहं वर्णयति कंसारिरिति। कंसारिः कृष्णोऽपि हृदये संसारवासनायाः बद्धः तस्य शृङ्खलां बीजरूपां राधाम् आधाय निधाय व्रजसुन्दरीः अन्या इति शेषः तत्याज ॥ १ ॥ वृत्तम् अनुष्टुप्।

इत इति। सः माधवः अनङ्गस्य कामस्य बाणेन खिन्नं मानसं यस्य तथाभूतः सन् इतस्ततः तां राधाम् अनुसृत्य अन्विष्य कृतः अनुतापः पश्चात्तापः येन तादृशः सन् ताम् अप्राप्य ... कलिन्दस्य सूर्यस्य नन्दिनी यमुना तस्य तटान्ते कुञ्जे

गुर्जरीरागयतिमठतालाभ्यां गीयते ।

मामियं चलिता विलोक्य वृतं वधूनिचयेन
सापराधतया मयापि न वारितातिभयेन ।
"हरिहरि हतादरतया गता सा कुपितेव" ध्रुवम् ॥ ३ ॥
किं करिष्यति किं वदिष्यति सा चिरं विरहेण ।
किं जनेन धनेन किं मम जीवितेन गृहेण 'हरिहरि' ॥ ४ ॥
चिन्तयामि तदाननं कुटिलभ्रु रोषभरेण ।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण 'हरिहरि' ॥ ५ ॥
तामहं हृदि सङ्गतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि 'हरिहरि' ॥ ६ ॥

प्रान्ते वसन् कुञ्जं लतादिपरिच्छितस्थानं तत्र निषसाद उपविष्टः ॥ २ ॥
वंशस्थविलं वृत्तम् ।

गुर्जरीरागेण प्रतिमठतालेन च गीयते ।

मामिति । इयं राधा वधूनां नारीणां निचयेन समूहेन वृतं मां विलोक्य चलिता, मयापि सापराधतया अपराधित्वेन अतिभयेन अतिभीतेनेत्यर्थः गता न वारिता, हरि हरि इति खेदतापद्योतकमव्ययम् । तस्मात् सा हतादरतया अनादरवशात् कुपितेव सञ्जातकोपेव गता ॥३॥

किमिति । सा चिरं विरहेण दीर्घेण वह्निच्छेदेन किं करिष्यति, किं वदिष्यति । तया विनेति अध्याहार्यं तया विना मम जनेन वा धनेन किं ? (किं बहुना) जीवितेन गृहेण गृहावस्थानेन वा किं ? न किमपि प्रयोजनमित्यर्थः ॥ ४ ॥

चिन्तयामीति । रोषभरेण कोपातिशयेन कुटिले कुञ्चिते भ्रुवौ यस्मिन् तादृशं तस्याः राधाया आननं उपरि भ्रमता भ्रमरेण आकुलं शोणं रक्तवर्णं पद्ममिव चिन्तयामि ध्यायामि ॥ ५ ॥

तामिति । अहं हृदि सङ्गतां हृदयस्थामित्यर्थः तां राधाम्

तन्वि ! खिन्नमसूयया हृदयं तवाकलयामि ।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि 'हरिहरि' ॥७॥
दृश्यसे पुरतो गतागतमेव मे विदधासि ।
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि 'हरिहरि' ॥ ८ ॥
क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि ! दर्शनं मम मन्मथेन दुनोमि 'हरिहरि' ॥९॥
वर्णितं जयदेवकेन हरेरिदं प्रणतेन ।
केन्दुविल्वसमुद्रसम्भवरोहिणीरमणेन 'हरिहरि' ॥ १० ॥

इति सप्तमः प्रबन्धः ।

अनिशं पुनःपुनः अयम् अत्यर्थं रमयामि मनोरथेन तया विहरा-मीत्यर्थः । किम् अथवा किंशब्दो विकल्पार्थः वने ताम् अनुसरामि अन्वेषयामि वृथा किं कथं विलपामि एतद्विलपनं निष्फलमित्यर्थः ॥६॥

तन्वि इति । हे तन्वि कृशाङ्गि ! तव हृदयम् असूयया ईर्ष्यया खिन्नं व्याकुलितम् आकलयामि सम्भावयामि, तत् तस्मात् त्वं कुत्र गतासि इति न वेद्मि न जानामि, तेन हेतुना ते तुभ्यम् अनुनयामि अनुनेतुमिच्छामीति भावः ॥ ७ ॥

दृश्यसे इति । हे राधे ! मे मम पुरतः अग्रतः एव गतागतं यातायातं विदधासि करोषि त्वं दृश्यसे, (तथापि) किं कथं पुरा इव पूर्ववत् ससम्भ्रमपरिरम्भणं सम्भ्रमेण आवेगेन आलिङ्गनं न ददासि ? ॥ ८ ॥

क्षम्यतामिति । हे सुन्दरि ! क्षम्यतां क्षमां कुरु। कदापि तव ईदृशम् एतत्प्रकारम् अपरम् अप्रियमिति शेषः । न करोमि, मम दर्शनं देहि, मन्मथेन कामेन दुनोमि क्लेशं प्राप्नोमीत्यर्थः ॥ ९ ॥

वर्णितमिति । केन्दुविल्वं नाम कः ग्रामः स एव समुद्रः तस्मात् सं-भवतीति तथोक्तः रोहिणीरमणश्चन्द्रः तेन जयदेवकेन जयदेव एव

हृदि विसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग ! क्रुधा किमु धावसि ॥ १ ॥
पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व ! मूर्च्छितजनाघातेन किं पौरुषम् ।
तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षानल
ज्वालाजर्जरितं मनागपि मनो नाद्यापि सन्धुक्षते ॥ २ ॥

अयमर्थः तेन स्वार्थे कन्प्रत्ययः । प्रवर्तेन मता हरेः कण्ठस्य इदं विरहगीत वर्णितं रचितम् ॥ १० ॥

इति सप्तमः प्रबन्धः ।

अथानि काममुपालभते हृदीति । हे अनङ्ग! प्रियारहिते राधाविरहिताय मयि हरभ्रान्त्या महादेवभ्रमेण न प्रहर प्रहारं मा कुरु, क्रुधा कोपेन तव प्रभुरिति विशेषेण किमु कथं धावसि ? ननु मयि हरभ्रमः तस्य च कः परिहार इत्याह हृदीति । हृदि मम वक्षसि अयं बिसलताया मृणालस्य हारः तापशान्त्यर्थं ध्रियते इति भावः भुजङ्गानां पन्नगानां नायकः श्रेष्ठः । (यः हरेण हृदि ध्रियते इति भावः) न । कण्ठे कुवलयानां नीलोत्पलानां दलश्रेणी दलपङ्क्तिः शैत्याय ध्रियते इति शेषः । सा प्रसिद्धा गरलस्य हालाहलस्य द्युतिः कान्तिः या हरकण्ठे विराजते इति भावः, न । किञ्च इदं गात्रविमर्दितं मलयजानां चन्दनानां रजः रेणुः शैत्याय सौगन्ध्याय च ध्रियते इति भावः, भस्म हरगात्रधूलिरिति भावः, न ॥११॥ हरिणीवृत्तम् ।

पाणाविति । क्रीडया निर्जितं विश्वं येन तत्सम्बुद्धौ । हे अनङ्ग ! अमुं चूतसायकं आम्रमञ्जरीरूपं बाणं पाणौ हस्ते मा

भ्रूपल्लवो धनुरपाङ्गतरङ्गितानि
बाणा गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्ज्जितजगन्ति किमर्पितानि ॥ ३ ॥

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्म्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयञ्च तन्वि ! तनुतां बिम्बाधरो रागवान्
सद्वृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥ ४ ॥

कुरु न दृष्टाय, चापं धनुः मा आरोपय न शरेण सन्धेहीत्यर्थः, मूर्च्छितस्य मदनप्रहारेण मोहं गतस्य जनस्य आघातेन प्रहारेण पतितप्रहारेणेत्यर्थः, किं पौरुषं कः पुरुषकारः। मे मम मनः तस्या एव मृगीदृशः श्यामाख्या राधायाः मनसिजेन कामेन प्रेरिताः अनन्ताः ये कटाक्षा एव अनल्पाः अग्नयः तेषां ज्वालाभिः तेजोभिः जर्ज्जरं नितरां विद्धमित्यर्थः, अतएव अद्यापि मनागपि अल्पमपि न सु-श्वते न प्रकृतिं गच्छति। कटाक्षाशुगेति पाठे कटाक्षा एव आशुगाः शरा इत्यर्थः॥ २॥ शार्दूलविक्रीडितम्।

भ्रूपल्लव इति। भ्रूः पल्लव इव तथोक्तः धनुः कार्म्मुकम् अपाङ्गतरङ्गितानि कटाक्षप्रेक्षितानि बाणा शराः, श्रवणपालिः कर्णपाशः गुणः मौर्वी इति एतानि निर्ज्जितानि जगन्ति यैः तादृशानि अस्त्राणि स्मरेण कामेन अनङ्गजयजङ्गमदेवतायाम् अनङ्गस्य जयः त्रिभुवनपराभवः तस्य या जङ्गमा चलिता देवता जयसाधनी तदधिष्ठात्री देवी-त्यर्थः, तथाभूतायां तस्यां राधायाम् अर्पितानि न्यस्तानि किम् ? ॥ ३॥ वसन्ततिलकं वृत्तम्।

अधुना तत् कटाक्षादिनिरपेक्षेण तस्य शान्तिरूपपीडामाह भ्रूचापे इति। हे तन्वि कृशाङ्गि ! भ्रूरेव चापः धनुः तत्र निहितः अर्पितः

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसम् ।
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते ॥ ५ ॥

कटाक्षविशिखः कटाक्ष एव विशिखः शरः मर्मव्यथां मर्मणि व्यथां निर्मातु विदधातु तत्र मर्मज्ञत्वादाकर्षकस्वभावत्वादिति भावः, श्यामात्मा श्यामवर्णः अन्यत्र मलिनस्वभावः कुटिलः भङ्गिमान् अन्यत्र वक्रस्वभावः कबरीभारः केशपाशः अपि मारस्य कामस्य अन्यत्र मारकस्य उद्यमं करोतु कुटिलस्य मलिनस्य प्रकृतिमारकस्वभावत्वादिति भावः, अयन्तु रागवान् रक्तवर्णः अन्यत्र क्रोधनः बिम्बाधरः बिम्बफल-सदृशः अधरः मोहं तावत् तनुतां विदधातु क्रुद्धेन मङ्क्षुतो मोह-माप्नोतीति भावः । तव वर्तुलः सुगोलः अन्यत्र सच्चरित्रः स्तन-मण्डलः मम प्राणैः क्रीड़तु प्राणान् आकर्षतीत्यर्थः । वर्तुलस्य परपीड़ाकरत्वासम्भवादिति भावः ॥ ४ ॥ शार्दूलविक्रीड़ितं वृत्तम् ।

तानीति । तानि पूर्वानुभूतानीत्यर्थः स्पर्शसुखानि राधायाः अङ्गस्पर्शजनितानि सुखानि, एतेन त्वगिन्द्रियविषयासङ्गः प्राप्तः । ते च पूर्वानुभूताः तरलाः चञ्चलाः स्निग्धाः स्नेहवर्षिणः दृशोः चक्षुषोः विभ्रमाः विलासाः एतेन चक्षुरिन्द्रियविषयासङ्गलाभः । तत् अनुभूतं वक्त्रमेव अम्बुजं तस्य सौरभम् एतेन घ्राणेन्द्रियविषया-सक्तिरुक्ता । स च पूर्वानुभूतः सुधास्यन्दी अमृतस्रावी गिरां वाचां वक्रिमा वक्रत्वं भङ्गिविशेष इत्यर्थः, एतेन श्रवणेन्द्रियविषयासक्तिः सूचिता । सा च बिम्बाधरस्य माधुरी मधुरता एतेन रसनेन्द्रिय-विषयासङ्गः प्राप्तः । इति एवं विषयेषु आसङ्गे आसक्तौ अपि मम मानसं तस्यां राधायां लग्नः समाधिरेकाग्रता यस्य तादृशं तदेका-ग्रचित्तं, हन्तेति खेदसूचकमव्ययं तदपि विरहव्याधिः विच्छेद-

तिर्य्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्-
गीतस्थानकृतावधानललनालक्षैर्न संलक्षिताः ।
संमुग्धं मधुसूदनस्य मधुरे राधामुखेन्दौ मृदु-
स्पन्दं कन्दलिताश्चिरं दधतु वः क्षेमं कटाक्षोर्मयः ॥ ६ ॥

इति श्रीगीतगोविन्दे मुग्धमधुसूदनो नाम तृतीयः सर्गः ।

अथ चतुर्थः सर्गः ।

स्निग्धमधुसूदनः ।

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् ।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥ १ ॥

यन्त्रणा कथं वर्त्तते । समाधिसमय पीड़ाया अवश्यमादिति भाव ॥ ५ ॥ शार्दूलविक्रीडितं वृत्तम् ।

अधुना आशिषा सर्गं समापयति तिर्य्यगिति । तिर्य्यक् वक्रः कण्ठः यस्य अतः विलोलः चञ्चलः मौलिः मस्तकं तत्स्थचूड़ा वा यस्य तथाभूतः तथा तरलौ चञ्चलौ उत्तंसौ कर्णकुण्डलौ यस्य तादृशः ततः कर्मधारयः । तस्य मधुसूदनस्य मधुरे मनोहरे राधायाः मुखम् इन्दुरिव तस्मिन् मृदुस्पन्दम् ईषत्स्फुरणं यथा तथा कन्दलिताः निःसृताः वंशात् वेणुतः उच्चरत् यत् गीतं तस्य स्थानेषु कृतम् अवधानं यैः तादृशैः ललनानां गोपसुन्दरीणां लक्षैः न संलक्षिताः अविज्ञाता इत्यर्थः कटाक्षाणाम् ऊर्मय तरङ्गाः अपा-ङ्गसंचलनरूपा दत्तैः, वः युष्माकं चिरं क्षेमं ददतु ॥ ६ ॥ शार्दूल-विक्रीडितं वृत्तम् ।

इति तृतीयः सर्गः ।

यमुनेति । राधिकायाः सखी काचित् सहचरी यमुनायाः तीरे

अथ अष्टमः प्रबन्धः ।

कर्णाटरागेकतालीतालाभ्यां गीयते ।

निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरं
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरं
"सा विरहे तव दीना माधव !
मनसिजविशिखभयादिव भावनया त्वयि लीना" "ध्रुवम्"
अविरलनिपतितमदनशरादिव भवदवनाय विशालम् ।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालं "सा विरहे"

यत् वानीरनिकुञ्जं वेतसलतावेष्टितस्थानं तत्र मन्दं निभृतं यथा तथा आस्थितम् उपविष्टं प्रेमभरेण अतिशयेन उद्भ्रान्तं आकुलं माधवं प्राह उवाच ॥ १ ॥

कर्णाटरागेण एकतालीतालेन च गीयते । कर्णाटरागलक्षणं यथा । कृपाणपाणिर्गजदन्तपत्रमेकं वहन् दक्षिणकर्णपूरे । संस्तूयमानः सुर-चारणौघैः कर्णाटरागः शिखिनीलकण्ठः इति ।

निन्दतीति । हे माधव ! तव विरहे दीना सा राधा मनसि-जस्य कामस्य विशिखेभ्यः शरेभ्यः भयादिव भावनया चिन्तनेन त्वयि लीना त्वदधीना इत्यर्थः, चन्दनं निन्दति इन्दुकिरणं चन्द्र-मयूखं च अनुलक्ष्य इत्यर्थः, अधीरं यथा तथा खेदं तापं विन्दति लभते, मलयसमीरं मलयानिलं व्यालानां सर्पाणां निलयः स्थानं चन्दन-तरुः तस्य मिलनेन संसर्गेण गरलमिव कलयति बुध्यते च । एतेनास्या विरहोत्कण्ठितात्वं ध्वनितम् । तथाचोक्तं यस्याः चिरे-ऽप्यङ्ग प्रायो नैति वल्लभः । सा परागमनव्यग्रा विरहोत्कण्ठिता मतेति ॥ २ ॥

अविरलेति । किञ्च अविरलम् अनवरतं निपतितः यः मदनस्य शरः तस्मात् त्राणादिव भवतः हृद्रक्षणायेति भावः । भवदवनाय रक्ष-

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् ।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयं "सा विरहे
वहति च गलितविलोचनजलधरमाननकमलमुदारम् ।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारं "सा विरहे
विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं "सा विरहे
प्रतिपदमिदमपि निगदति माधव ! तव चरणे पतिताहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं "सा विरहे

याय स्वहृदयमर्मणि निजहृदयरूपे मर्मस्थाने विशालं विस्तीर्णं सजल नलिनीदलानां जालं समूहमेव वर्म तनुत्रं नाम्नावरण विशेषं करोति ॥ ३ ॥

कुसुमेति । अपि च कुसुमविशिखस्य कामस्य शरतल्पं शरशय्या-भूतं अनल्पाभिः बहुभिः विलासकलाभिः विलासभावैः कमनीयं मनोज्ञं कुसुमशयनीयं पुष्पशय्यां तव परिरम्भसुखाय आलिङ्गनसुखला-भाय व्रतमिव करोति ॥ ४ ॥

वहतीति । विलोचनाभ्यां गलितं सुतरां गलितं विलोचनयोः जलं धरतीति तथोक्तम् उदारं विकस्वरम् आननकमलं तथापि विकटेन दारुणेन विधुन्तुदस्य राहोः दन्तेन यत् दलनं तेन गलिता अमृतधारा यस्मात् तादृशं विधुं चन्द्रमिव वहति रोदितीत्यर्थः ॥ ५ ॥

विलिखतीति । पुनश्च रहसि एकान्ते कुरङ्गमदेन कस्तूरिकया असमशरभूतं कामस्वरूपं भवन्तं विलिखति, अधः तत्र लिखितस्य कामरूपस्य भवतः अधस्तात् मकरं कामवाहनं करे धृत्वा लिखित-वेति भावः । नवचूतं नवं चूताङ्कुररूपं शरं विनिधाय लिखित्वा प्रणमति च ॥ ६ ॥

प्रतिपदमिति । प्रतिपदं प्रतिक्षणम् इदं निगदति च । हे माधव !

ध्यानलयेन पुरः परिकल्प्य
भवन्तमतीव दुरापम्।
विलपति हसति विषीदति रोदिति
चञ्चति मुञ्चति तापं "सा विरहे" ॥ ८ ॥

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम्।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयं "सा विरहे" ॥

इति श्रीगीतगोविन्दे अष्टमः प्रबन्धः।

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते।

अङ्गं तव चरणे पतितम्, त्वयि विमुखे सति सुधानिधिः चन्द्रकिरणो-ऽपि चन्द्रः मयि वपुषि अदिति तनुदाहं तनुते शरीरे अग्नीकरो-तीत्यर्थः ॥ ७ ॥

ध्यानेति। हे कृष्ण ! अतीव दुरापः दुर्लभं भवन्तं ध्यानलयेन समाधियोगेन पुरः परिकल्प्य निश्चित्य विलपति विलापं करोति हसति, विषीदति, रोदिति, चञ्चति इतस्ततः चलति, ताप मनः क्षोभं मुञ्चति त्यजति च ॥ ८ ॥

श्रीजयदेवेति। इदं श्रीजयदेवभणितं यदि मनसा अधिकं नट-नीयं नर्त्तयितुमभिलषणीयमित्यर्थः तदा हरेः कृष्णस्य विरहेण आकुलाया वल्लवयुवत्याः राधायाः या सखी तस्याः वचनं दूतीवाक्यं पठ-नीयम् ॥ ९ ॥

आवास इति। हन्त खेदे, हे कृष्ण ! त्वद्विरहेण तव विच्छेदेन सा राधापि हरिणीरूपायते आत्मानं हरिणीमिव आचरति तथा हि आवासः अङ्कं विपिनायते विपिनमिव आचरति अङ्कं वनीभूतमित्यर्थः। प्रियसखीनां माला समूहोऽपि जालायते जालमिव आचरति आत्मा-नं बद्धं मन्यमानेति भावः, तापः सन्तापः अपि श्वसितेन निश्वास-

सापि त्वद्विरहेण हन्त ! हरिणीरूपायते हा ! कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥ १० ॥

अथ नवमः प्रबन्धः ।

देशाखरागैकतालीतालाभ्यां गीयते ।

स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरिव भारम् ।
"राधिका विरहे तव केशव !" ध्रुवम् ॥ ११ ॥
सरसमसृणमपि मलयजपङ्कम् ।

व्याधेन दावदहनक्षुद्रागाम्भः व्याधावलाप इव आचरति । किं बहुना हा ! कथमिति चलनखोलयोलक्षचनमतं कन्दर्पोऽपि शार्दूलवत् विक्रीडितम् व्यापारं विरचयन् कुर्वन् यमायते यम इव आचरति ॥१०॥ शार्दूलविक्रीडितं वृत्तम् ।

देशाखरागेण एकतालीतालेन च गीयते । देशाखरागलक्षणं यथा । आस्फोटयन्विकटतरोरुदोरुमूर्ती नियुद्धवलवद्विधाव्रताढ्यः दृष्टः ।

षड्जेन परिहीनो च मल्लवषट् । रि-तोमततरसंयुक्तो ... अ-वापि संयुतः । ध-ग-वर्जोऽवरोहे आरोहावरस्वरमूर्च्छनः । तीव्रो यत्र निषादः काहेवाक्य च विराजते ॥

म प ध ध ध ध नि प ध ध ध रि ध म म पा ध म प ध
ध म ध प ध ध ध रि ध रि ध ध नि प म ध ध ध धा ।
रि भी पा ध ध ध रि ध ध नि प म प ध ध धा ।

इति देशाखः । प्रातःकालीनः ।

स्तनेति । हे केशव ! सा राधिका तव विरहे कृशतनुः क्षीणाङ्गी अतएव स्तनविनिहितं स्तनयोरर्पितम् उदारम् बहुमूल्यमपि हारं भारमिव मनुते ॥ ११ ॥

सरसेति । सरसम् आर्द्रं मसृणं कोमलम् अपि मलयजपङ्कं

पश्यति विषमिव वपुषि सशङ्कं "राधिका" ॥ १२ ॥
श्वसितपवनमनुपमपरिणाहम् ।
मदनदहनमिव वहति सदाहं "राधिका" ॥ १३ ॥
दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिव विगलितनालं "राधिका" ॥ १४ ॥
नयनविषयमपि किसलयतल्पम् ।
कलयति विहितहुताशविकल्पं "राधिका" ॥ १५ ॥
त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलं "राधिका" ॥ १६ ॥
हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेव निकामं "राधिका" ॥ १७ ॥

चन्दनविलेपनं वपुषि शरीरे विषमिव सशङ्कं यथा तथा पश्यति ॥ १२ ॥

श्वसितेति । अनुपमपरिणाहम् अतिदीर्घं सदाहम् उष्णमित्यर्थः श्वसितपवनं निश्वासवातं मदनदहनं कामानलमिव वहति ॥ १३ ॥

दिशीति । दिशि दिशि सततं जलकणानां जालैः सह वर्त्तमानं नयनं विगलितनालं खण्डितनालं नलिनं पद्ममिव किरति नयनात् बाष्पवारिपतनं पद्मात् नालखण्डनमिव प्रतिभातीति भावः ॥ १४ ॥

नयनेति । किसलयतल्पं पल्लवशयनमपि नयनविषयं नेत्रगोचरं विहितः जनितः हुताशस्य अग्नेः विकल्पः संशयः यत्र तादृशं कलयति मन्यते ॥ १५ ॥

त्यजतीति । पाणितलेन करतलेन सायं सन्ध्यायाम् अलोलम् अचञ्चलं बालशशिनम् अभिनवं चन्द्रमिव कपोलं गण्डदेशं न त्यजति धारयतीत्यर्थः ॥ १६ ॥

हरिरिति । सकामं सोत्कण्ठं विरहविहितमरणा निकामं दु-

श्रीजयदेवभणितमिति गीतम् ।

सुखयतु क्षेमपदमुपनीतं "राधिका" ॥ १८ ॥

इति श्रीगीतगोविन्दे नवमः प्रबन्धः ।

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति

ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।

एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्

स्वर्वैद्यप्रतिम ! प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः ॥१८॥

स्मरातुरां दैवतवैद्यहृद्य !

त्वदङ्गसङ्गामृतमात्रसाध्याम् ।

निश्चितमस्मुदिव. यतो निकामं अनवरतं हरिरिति हरिरिति मन्त्रं जपति ॥ १७ ॥

श्रीति । इति इदं श्रीजयदेवभणितं गीतं क्षेमपदं कल्याणपदमुपनीतं कल्याणभक्तिनिरताः सुखयतु सुखीकरोतु ॥ १८ ॥

सेति । हे स्वर्वैद्यप्रतिम ! अश्विनीकुमारसदृश ! स्वर्वैद्यावश्विनीसुतावित्यमरः । यदि त्वं प्रसीदसि प्रसन्नो भवसि तदा एतावत्यपि अतकटेऽपीत्यर्थः अतनुज्वरे कामज्वरे अन्यत्र महति ज्वरे सति सा वरतनुः वरवर्णिनी राधा ते तव रसात् अनुग्रहजनितात् अनुरागात् अन्यत्र औषधात् किं न जीवेत् अपि तु जीवेदेव, अन्यथा हस्तकः हस्तावलम्बनं त्यक्तः उपायान्तरं नाप्नोति भावः । ज्वरावस्थां दर्शयति सेत्यादि । सा रोमाञ्चति रोमाञ्चिता भवति, सीत्करोति सीत्कारं करोति, विलपति उत्कम्पते कम्पिता भवति, ताम्यति ग्लायति, ध्यायति, चिन्तयति उद्भ्रमति प्रमीलति नेत्र निमीलनं करोति उद्याति उद्गच्छति मूर्च्छति मोहं प्राप्नोति अपि ॥ १८ ॥ शार्दूलविक्रीडितं वृत्तम् ।

स्मरेति । हे दैवतवैद्यहृद्य ! हे उपेन्द्र ! अश्विनीकुमारसदृशसुन्दराङ्ग ! स्मरातुरां कामार्तां तव अङ्गसङ्ग एव अमृतं तत्काले

विमुखबाधां कुरुषे न राधाम्
उपेन्द्र वज्रादपि दारुणोऽसि ॥ २० ॥

कन्दर्पज्वरसंज्वराकुलतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु सन्ताम्यति ।
किन्तु क्लान्तिवशेन शीतलतनुं त्वामेकमेकं प्रियं
ध्यायन्ती रहसि स्थिता कथमसौ क्षीणापि क्षणं प्राणिति ॥ २१ ॥

क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पितायाम् ? ॥ २२ ॥

साध्वीं प्रतिकाङ्क्षां राधां विमुखबाधां रोगमुक्तां न कुरुषे यदीति शेषः तदा वज्रादपि कुलिशात् अपि दारुणः असि भवसि ॥२०॥ उपेन्द्रवज्रा-वृत्तम् ।

कन्दर्पेति । कन्दर्पस्य ज्वरः कन्दर्पज्वरः तस्य संज्वरः सन्तापः तेन आकुला तनुर्यस्याः तादृश्याः अस्याः राधायाः चेतः चित्तं चन्दनस्य चन्द्रमसः कमलिन्याः पद्मिन्याश्च चिन्तासु चिरं सन्ताम्यति ग्लानिमनु-भवति किन्तु असौ राधा क्षीणापि नितरां कृशापि क्लान्तिवशेन अवसा-दवशेन शीतलतनुम् चन्द्रादिभिरनिवार्यः सन्तापस्तस्या देहे अन्यथा न जायते इति भावः अटोपदोषेऽपि अभिरूपनिमित्तैः एकम् अद्वितीयं प्रियं रहसि एकान्ते स्थिता ध्यायन्ती असौ कथं क्षणं प्राणिति जीवति, आश्च-र्यम् ? ॥ २१ ॥ शार्दूलविक्रीडितं वृत्तम् ।

क्षणमिति । हे कृष्ण ! नयननिमीलनेऽपि खिन्नया खेदमा-पन्नया यया पुरा पूर्वं ते तव क्षणमपि विरहः न सेहे, असौ पुष्पि-तायां रसालशाखायां रसालशाखां चूतवृक्षं विलोक्य चिरविरहेण कथं श्वसिति जीवति ? ॥ २२ ॥ पुष्पिताग्रावृत्तम् ।

वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्द्धनं
बिभ्रद्वल्लवसुन्दरीभिरधिकानन्दाच्चिरं चुम्बितः।
कन्दर्पेण तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः ॥२२॥

इति श्रीगीतगोविन्दे स्निग्धमधुसूदनो
नाम चतुर्थः सर्गः ॥ ४ ॥

अथ पञ्चमः सर्गः।

साकांक्षपुण्डरीकाक्षः।

अहमिह निवसामि याहि राधां
अनुनय मद्वचनेन चानयेथाः।

इदानीमाशिषा सर्गं समापयति वृष्टीति। गोपतनोः गोपालरूपस्य कंसद्विषः कृष्णस्य वृष्टिभिर्व्याकुलं यत् गोकुलं तस्य अवनं रक्षणं तत्र रसः अनुरागः तस्मात् गोवर्द्धनं गिरिम् उद्धृत्य उत्पाट्य बिभ्रत् दधानः अधिकानन्दात् वृष्टिभयनिवारणजनितेन आनन्दातिशयेनेत्यर्थः वल्लवानां गोपानां सुन्दरीभिः चिरं चुम्बितः इतचुम्बनः, तथा कन्दर्पेण काम-वशेन ताभिः गोपसुन्दरीभिः अर्पिता दत्ता या अधरतटी अधरप्रदेशाः तासां सिन्दूरमुद्रया अधरावलोपितकपोलसिन्दूरचिह्नेन अङ्कितः सुशोभितः बाहुः श्रेयांसि मङ्गलानि तनोतु विस्तारयतु ॥ २२ ॥ शार्दूलविक्रीडितं वृत्तम्।

अथ सख्या प्रेरिता वा सखी राधां प्रति आह अहमिति। अहम् इह अस्मिन् विजने निवसामि तिष्ठामि, त्वं याहि गच्छ, मम वच-

इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ १ ॥

वराटीरागेण रूपकतालेन च गीयते।

वहति मलयसमीरे मदनमुपनिधाय
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय
"तव विरहे वनमाली सखि! सीदति" ध्रुवम् ॥ २ ॥

तेन राधां अनुनय यान्तु, इत्थं आनयेत्याह इतीति। इत्थं मधुरिपुणा कृष्णेन नियुक्ता सखी स्वयम् एत्य आगत्य पुनः राधां जगाद ॥ १ ॥
पुष्पिताग्रावृत्तम्।

वराडिरागेण रूपकतालेन च गीयते। वराडिरागध्यानं यथा। विनोदयन्ती दयितं सुकेशी सुवर्णकान्त्या चामरचालनेन कर्णे दधाना सुरपुष्पगुच्छं वराङ्गनेयं कथिता वराटी। तच्छोधपारिजातोक्त-लक्षणं यथा। रि-कोमला ग-तीव्राख्या कोमलोत्तरधैवता। निना तीव्रेण संयुक्ता वराटी धैवतादिका। ग-तीव्रतरसम्बन्धान्दोलनेन मनोहरा ॥

धा धा नी सा रि ग मा पा म ग मा रि स। ध प नी
स रि ग म ग रि ग रि स। ध नि स रि ग रि स नि
ध प म ध प म मा सा पा ग म ग रि सा ध धा नि
सा रि ग म ग रि स रि स रि स नि स रि स नि
स नि स नि ध ध प म प म ग रि स। धा धा नीसा ॥

इति वराटिका। द्वितीयप्रबन्धोत्तरम्।

वहतीति। हे सखि! तव विरहे वनमाली मदनं कामस्तन्नि-धाय उपचयाय मलयसमीरे वहति तथा कुसुमनिकरे पुष्पसमूहे विर-हिणां हृदयदलनाय स्फुटति विकसति सति सीदति अवसादं गच्छति इत्यन्वयः ॥ २ ॥

दहति शिशिरमयूखे मरणमनुकरोति

पतति मदनविशिखे विलपति विकलतरोऽति "तवविरहे"

ध्वनति मधुपसमूहे श्रवणमपिदधाति ।

मनसि कलितविरहे निशि निशि रुजमुपयाति "तवविरहे"

वसति विपिनविताने त्यजति ललितमपि धाम ।

लुठति धरणिशयने बहु विलपति तव नाम "तव विरहे" ॥

भणति कविजयदेव इति विरहविलसितेन ।

मनसि रभसविभवे हरिरुदयतु सुकृतेन "तव विरहे" ॥६॥

इति श्रीगीतगोविन्दे दशमः प्रबन्धः ।

दहतीति । शिशिरमयूखे शीतरश्मौ दहति दहनवत् किरणं वितन्वति सति मरणम् अनुकरोति मृत इव भवति तथा मदनविशिखे कामशरे पतति, सति अति विकलतरः नितरां व्याकुलः सन् विलपति विलापं करोति ॥ १ ॥

ध्वनतीति । मधुपानां भ्रमराणां समूहे ध्वनति गुञ्जति सति श्रवणं कर्णम् अपि दधाति आच्छादयति उद्दीपकत्वेनासह्यत्वादिति भावः तथा निशि निशि प्रतिरात्रं कलितविरहे प्रबलविरहव्याप्ते मनसि रुजं पीडाम् उपयाति गच्छति ॥ ४ ॥

वसतीति । विपिनविताने वनगहने वसति, ललितं मनोहरमपि धाम गृहं त्यजति, धरणिशयने भूशय्यायां लुठति तथा तव नाम बहु वारं वारं विलपति जपतीत्यर्थः ॥ ५ ॥

भणतीति । कविजयदेवः विरहविलसितेन विच्छेदविलासेन क्रियाविशेषणमिदम् इति अमुं प्रकारं भणति गदति । हरिः रभसविभवे हर्षपूर्णे मनसि सुकृतेन उदयतु उदयं प्राप्नोतु ॥ ६ ॥

पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धय-
स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति ॥ ७ ॥

अथ एकादशः प्रबन्धः ।

केदाररागेण एकतालेन च गीयते ।

रतिसुखसारे गतमभिसारे मदनमनोहरवेशम् ।
न कुरु नितम्बिनि ! गमनविलम्बनमनुसर तं हृदयेशम् ।
गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली ।
धीरसमीरे यमुनातीरे वसति वने वनमाली ॥ ध्रु० ॥ ८ ॥

पूर्वमिति । पूर्वं यत्र त्वया समं सह रतिपतेः कामस्य सिद्धयः चरितार्थता आसादिताः प्राप्ताः माधवेनेति शेषः तस्मिन्नेव निकुञ्जरूपे मन्मथमहातीर्थे कामक्षेत्रे माधवः त्वाम् अनिशम् अनवरतं ध्यायन् तथा तवैव आलापरूपां मन्त्रावलीं मन्त्रसमूहं जपन् पुनः भूयः अतिशयेन तव कुचकुम्भयोः निर्भरः गाढः परीरम्भः आलिङ्गनं तदेव अमृतं वाञ्छति अभिलषति ॥ ७ ॥ गाढं अविमोचितं इत्यर्थः ।

केदाररागेण एकतालीतालेन च गीयते । केदाररागेणेत्यत्र गुर्जरीरागेणेत्यपि पाठान्तरम् । म-नी तीव्रौ तु केदार्यां रि-धौ नष्टौ च मानिता ।

स म प नि स म ग म स नि प नि स । स प म स
नि प म ग म स म म प म म स । म म प नि प
म ग स नि स नि स नि स नि स स नि स स म म
प म म स नि स सा ॥

इति केदारी । तृतीयप्रहरोचितम् ।

रतीति । हे नितम्बिनि ! गमनविलम्बनं न कुरु, रतौ यत्सुखं तस्य सारः यत्र तादृशे अभिसारे सङ्केतस्थाने गतं मदनवत् मनो-

रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते! प्रियस्तव वर्त्तते ॥ १६ ॥

त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम्।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे! विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ॥ १७ ॥

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तजात्
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः।

वारं वारं श्वासान् निश्वासान् वियोगजनितानिति भावः। विकिरति मुञ्चति, पुरः अग्रतः मुहुः आशाः दिशः ईक्षते, मुहुः कुञ्जं प्रविशति, मुहुः गुञ्जन् कथं त्वया नागतं केन वा वारितासि, किं वा पथि काचित् दुर्घटना जातेत्यादि अव्यक्तं वदन् किञ्चित् जल्पन् ताम्यति, मुहुः शय्यां रचयति मुहुश्च पर्याकुलं परितः व्याकुलं [illegible] ईक्षते अवलोकयति, इत्थं मदनस्य कदनेन पीड़नेन [illegible] वर्त्तते ॥ १६ ॥ हरिणीवृत्तम् ।

त्वदिति। अधुना तव वाम्येन समं सह अभिमानेन मौनीभावादिति भावः। तिग्मांशुः सूर्यः समग्रं सम्पूर्णं यथा तथा अस्तं गतः, तमः तिमिरं गोविन्दस्य मनोरथेन समं सान्द्रतां प्राप्तं क्रमशो गोविन्दस्य त्वदनुरागः यथा गाढ़तां प्राप्तः तथा अन्धकारोऽपीत्यर्थः। मम अभ्यर्थना अनुरोधश्च कोकानां चक्रवाकानां करुणस्वनेन कातरविलापेन रात्रौ तेषां विच्छेदादिति भावः। सदृशी तुल्या दीर्घा महती, अत्याग्रहयुक्ताऽयं वर्त्तते इति भावः। तत् तस्मात् हे मुग्धे! मूढे! असौ अभिसारक्षणः कान्ताभिगमनसमयः रम्यः ॥ १७ ॥ शार्दूलविक्रीड़ितम् ।

अभिसारे प्रीते राधिकां दर्शयति आश्लेषादिति। अस्यार्थः अपर-

प्राप्त्यर्थं गतयोर्मनाभिलषितयोः सन्धावबेलामते-
र्दम्पत्योर्निभृतं को न को न तनुते लीलाविलासो रसः १८
समयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि ! सुभगः पश्यन् स त्वामुपैतु कृतार्थताम् ॥१९॥
राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली

प्राप्त्यर्थं परकीयरतिभावाभिलाषं गतयोः वद्धितस्नान प्राप्तयोः भ्रमात् भ्रमणात् अन्वेषणादित्यर्थः, निभृतं तनपि विलसितयोः सङ्गतयोः यथाक्रमम् आश्लेषात् आलिङ्गनात् अनु पश्चात् चुम्बनात् अनु पश्चात् नखानाम् उल्लेखात् अनात् अनु पश्चात् आकलनात् आमर्शनात् प्रोद्बोधात् कामोद्बुधादित्यर्थः अनु पश्चात् सम्भ्रमात् सत्वरतायाः अनु पश्चात् रतारम्भात् शृङ्गारात् अनु पश्चात् प्रीतयोः परितोषं गतयोः पश्चात् सख्याः संलापैः आमतोः सैवं कथायामिति विस्तृतोः दम्पत्योः स्त्रीपुंसयोः कः कः लीलया कथया विविधः अभिलषितः रसः सम्भो- गाद्यास्वादः न भवति न, अपि तु सर्व एव सम्भोगः शृङ्गारादि- रसास्वादः भवत्येवेत्यर्थः ॥ १८ ॥ शार्दूलविक्रीडितं वृत्तम् ।

समयेति । हे सुमुखि ! स सुभगः तव प्रणयेन सौभाग्यशालि- त्वर्थः, तिमिरे अन्धकारे इत्यर्थः, पथि प्रतितरु समयचकितं यथा तथा दृशं नेत्रं विन्यस्यन्तीं निक्षिपन्तीं मुहुः पुनः पुनः स्थित्वा मन्दं यथा तथा पदानि वितन्वतीं विक्षिपन्तीं कथमपि अति कष्टेन रहः प्राप्ताम् एकान्ते उपस्थितां अनङ्गतरङ्गिभिः कामतरङ्गपूर्णैः अङ्गैः उपलक्षितां त्वां पश्यन् कृतार्थतां सफलमनोरथताम् उपैतु प्राप्नोतु ॥ १९ ॥ हरिणीवृत्तम् ।

इदानीमाशिषा सर्गमुपसंहरति राधेति । राधायाः मुग्ध

नेपथ्योचितनीलरत्नमवनीभारावतारक्षमः ।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः ॥ २० ॥

इति श्रीगीतगोविन्देऽभिसारिकावर्णने साकांक्ष-
पुण्डरीकाक्षो नाम पञ्चमः सर्गः ॥ ५ ॥

अथ षष्ठः सर्गः ।

धृष्टवैकुण्ठः ।

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ।
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥ १ ॥

अथ द्वादशः प्रबन्धः ।

गुणकरीरागेण रूपकतालेन च गीयते ।

पश्यति दिशि दिशि रहसि भवन्तम्

सुन्दरं यत् मुखारविन्दं तस्य मधुपः भ्रमरः, त्रैलोक्यस्य त्रिभुवनस्य या मौलिस्थली शिरःप्रदेशः तस्या नेपथ्योचितं अलङ्कारभूतं नीलरत्नम्, अवन्या भूमेः भारस्य अवतारे दुष्टानां कंसादीनां दमनेन हरणे क्षमः, व्रजसुन्दरीजनानां मनसां तोषे सन्तोषे प्रदोषः रजनीमुखरूपः तथा कंसस्य ध्वंसने धूमकेतुः अशुभसूचकग्रहविशेषः देवकीनन्दनः त्वां चिरम् अवतु रक्षतु ॥२०॥ शार्दूलविक्रीडितं वृत्तम् ।

अथेति । अथ अनन्तरं चिरम् अनुरक्ताम् अनुरागिणीं तां राधां लतागृहे गन्तुमशक्तां दृष्ट्वा सखी दूती मनसिजेन कामेन मन्दे निपीडिते गोविन्दे कृष्णे तस्याः राधायाश्चरितं प्राह ॥१॥ आर्यावृत्तम् ।

गुणकरीरागेण रूपकतालेन च गीयते । गुणकरीरागध्यानं यथा ।
दूतीमुखा कामयमानीवामाकापवली मद्गुरुमुमतले रतकृतः प्रेरित

त्वदधर   ्नि पिबन्तं

"नाथ ! हरे ! जय नाथ ! हरे ! सीदति राधा वासगृहे !" ध्रु०२

त्वदभिसरणरभसेन वलन्ती

पतति पदानि कियन्ति चलन्ती "नाथ ! हरे !" ॥३॥

विहितविशदबिसकिसलयवलया ।

जीवति परमिह तव रतिकलया । "नाथ ! हरे !" ॥४॥

हरिदासी स्वाभावतकुणीचकरी प्रदिष्टा । वकुलितपारिजातोद्भवधर्षं यथा, रि-ध-कोमलवर्णयुक्ता म-नि-वर्ज्जा शुभकरिका । षेवगोदृपाकृर्ष-युक्ता कम्पितान्तारधंयुता ।

ध ध धा ध प म पा । प म मा रि सा । म ध ध प म

प ध म मा रि स । स रि म म म म म रि म । ध रि

स स स स ध स स स स ध प स म म मा रि स । ध रि

रि रि रि स प स स ध प स पा ध मा रि स । स रि

म म म रि सा । पा ध प म म म म मा म म पा रि

सा । स स रि स मा पा म मा रि स रि रि रि स सा ।

इति शुभकरीं । अवतमङ्गलोकम् ।

पश्यतीति । हे नाथ ! हरे ! त्वं जय उत्कर्षेण वर्त्तस्व इत्यर्थः, सौभाग्यातिशयादिति भावः । तथा हि हे नाथ ! हरे ! राधा एकाकि एकान्ते दिशि दिशि प्रतिदिशं सख्याः राधायाः अधरस्य मधुराणि मधूनि पिबन्तं भवन्तं पश्यति वासगृहे निकुञ्जभवने सीदति त्वदागमनप्रतीक्षया क्लेशमनुभवतीत्यर्थः ॥ २ ॥

तवाभ्यागमने हेतुमाह त्वदिति । तव अभिसरणे यः रभसः वेगः हर्षो वा रभसो वेगहर्षयोरित्यमरः तेन वलन्ती उत्तिष्ठमाना सती कियन्ति पदानि चलन्ती पतति मूर्च्छतीति शेषः अतो गन्तुमशक्ता-मिति भावः दुःखमनुभवतीयम् ॥ ३ ॥

विहितेति । विहितं कृतं विशदं निर्मलं बिसस्य मृणालस्य

मुहुरवलोकितमण्डनलीला ।
मधुरिपुरहमिति भावनशीला । "नाथ ! हरे !" ॥५॥
त्वरितमुपैति न कथमभिसारम् ।
हरिरिति वदति सखीमनुवारम् । "नाथ ! हरे !" ॥६॥
श्लिष्यति चुम्बति जलधरकल्पम् ।
हरिरुपगत इति तिमिरमनल्पम् । "नाथ ! हरे !" ॥७॥
भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा । "नाथ ! हरे !" ॥ ८ ॥

[illegible]मयः अङ्कुर एव वलयं यया तादृशी सती परं केवलं तव रतिकथया अनुराग भावनया इह जीवति ॥ ४ ॥

मुहुरिति । मुहुः वारं वारम् अवलोकिता मण्डनस्य भूषणस्य लीला विलासो यया तथोक्ता तथा मम भूषणमिति निरीक्षमाणेत्यर्थः । किञ्च अहं मधुरिपुः कृष्णः इति भावनं चिन्तनं शीलं यस्याः तथाभूता अनवरतकृष्णचिन्तया कृष्ण एवाहमिति । तन्मयी जातेति भावः ॥ ५ ॥

त्वरितमिति । हरिः कथं त्वरितम् अभिसारं सङ्केतस्थानं न उपैति आगच्छति इति अनुवारं पुनः पुनः सखीं वदति पृच्छतीत्यर्थः ॥ ६ ॥

श्लिष्यतीति । हरिः उपगतः आगत इति बुद्धा जलधरकल्पं मेघसदृशम् अनल्पं गाढं तिमिरं श्लिष्यति आलिङ्गति चुम्बति ॥ ७ ॥

भवतीति । भवति त्वयि विलम्बिनि अनागते सति, वासकसज्जा सज्जितवासकगृहा सा विगलिता लज्जा यस्याः तादृशी सती विलपति रोदिति च ॥ ८ ॥

श्रीजयदेवकवेरिदमुदितम् ।
रसिकजनं तनुतामतिमुदितम् । "नाथ ! हरे !" ॥ ८ ॥

इति द्वादशः प्रबन्धः ।

विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजडिमकाकुव्याकुलं व्याहरन्ती ।
तव कितव ! विधायामन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥ १० ॥

अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति ।
इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥ ११ ॥

श्रीति । श्रीजयदेवकवेः उदितम् उक्तम् इदं रसिकजनम् अति-मुदितम् अतिप्रीतं तनुतां कुरुताम् ॥ ८ ॥

विपुलेति । हे कितव ! धूर्त ! विपुला महती पुलकानां रोमाञ्चानां पालिः पङ्क्तिर्यस्याः तथाभूता त्वच्चिन्तनेन जातरोमाञ्चा इत्यर्थः स्फीतः प्रवृद्धः सीत्कारः तव दन्तक्षतादिकल्पनेन जनित इति भावः यत्र तत् यथा तथा अन्तः मध्ये मध्ये जनिता जडिमा जाड्यम् उत्कण्ठाप्रभवः यत्र तादृशेन काकुना ध्वनेर्विकारेण परिरम्भचुम्बनादिप्रार्थनाजनितेन इति भावः व्याकुलं यथा तथा व्याहरन्ती ब्रुवती सा मृगाक्षी मृग-नयना अमन्दा गाढा या कन्दर्पचिन्ता कामचिन्ता तां विधाय परि-कल्प्य तव रसजलनिधौ शृङ्गारसागरे मग्ना ध्याने तव चिन्तने लग्ना च वर्तते इति वाक्यार्थम् ॥ १० ॥ मालिनीवृत्तम् ।

अङ्गेष्विति । एषा वरतनुः वराङ्गी अङ्गेषु आभरणं करोति परिधत्ते तवानुरञ्जनार्थमिति भावः, पत्रे सञ्चारिणि चलति सति बहुशः पुनःपुनः त्वां प्राप्तम् उपस्थितं परिशङ्कते तर्कयति शय्यां वितनुते विर-

किं विश्राम्यसि कृष्ण ! भोगिभवने भाण्डीरभूमीरुहि
भ्रात ! यासि न दृष्टिगोचरमितः सानन्दनन्दास्पदम् ।
राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः ॥ १२ ॥

इति श्रीगीतगोविन्दे वासकसज्जावर्णने धृष्टवैकुण्ठो
नाम षष्ठः सर्गः ॥ ६ ॥

येन विधत्ते, चिरं ध्यायति चिन्तयति च । इति इत्थम् आकल्पस्य भूषणस्य विकल्पस्य वितर्कस्य तल्पस्य शय्यायाश्च रचनायां तथा सङ्कल्पलीलाशतेषु परिकल्पितविलासव्यूहेषु व्यापृताऽपि त्वया विना निशां न नेष्यति न यापयिष्यति तस्मात् निशायापनमतिदुष्करमिति भावः ॥ ११ ॥
शार्दूलविक्रीडितं छन्दः ।

इदानीं कवीन्द्रो आशिषं प्रयुङ्क्ते किमिति हे कृष्ण, किं कथं विश्राम्यसि, हे भ्रातः ! भोगिभवने भोगिनः विलासिनः भवने आलये भाण्डीरभूमिरुहि भाण्डीरवृक्षे तदाख्या नदीतटे वासि गच्छ त्वम्‌ इतः अस्मात् स्थानात् सानन्दस्य आनन्दपूर्णस्य नन्दस्य आस्पदं स्थानं न दृष्टिगोचरम् । येन तत्र गन्तुं भवेदिति भावः । राधायाः तत् एतत् वचनं तदध्वगमुखात् पथिकवदनात् पथिकैर्यस्या श्रुत्वा प्रोक्तमिति भावः निःसृतं वचनं नन्दस्य कदाचिच्छ्रवणगोचरतां न इति भावः अन्तिके गोपतः निकटवर्तिनः गोविन्दस्य सायं सन्ध्यासमये अतिथिप्राशस्त्यम् अतिथिसत्कारः गर्भे यासां ताः गिरः वाचः जयन्ति सर्वोत्कर्षेण वर्तन्ताम् । गोपनप्रकारः छिलिकादीनामन्तर्गतोऽर्थो बोद्धव्यः तथा हि । हे भ्रातः ! कृष्ण भोगिभवने कृष्णसर्पनिलये भाण्डीरभूमिरुहि कथं विश्राम्यसि, सानन्दनन्दास्पदम् इतः दृष्टिगोचरं न यासि न गच्छसि ? अपि तु गन्तव्यमेवेति भावः ॥ १२ ॥ शार्दूलविक्रीडितं छन्दः ।

अथ सप्तमः सर्गः ।

नागरनारायणः ।

अत्रान्तरे च कुलटाकुलवर्त्मपात-
सञ्जातपातक इव स्फुटलाञ्छनश्रीः ।
वृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥ १ ॥

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे मधुरा ।
विरचितविविधविलापं सा परितापं चकारोच्चैः ॥ २ ॥

अथ चन्द्रोदयं वर्णयन् विरहव्यथा उद्दीपयतीति कथयति । अत्र अन्तरे समये दिशैव सुन्दरी दिक्सुन्दरी तस्या वदने चन्दनबिन्दुः चन्दनतिलकभूतः इन्दुः चन्द्रः कुलटानां कुचारिणीनां कुलवर्त्मनः कुलाचारात् यः पातः पातनं तेन सञ्जातं पातकं यस्य तथाभूत इव स्फुटा प्रकटा लाञ्छनश्रीः कलङ्कशोभा यस्य तादृशः सन् अंशुजालैः किरणसमूहैः वृन्दावनान्तरम् अदीपयत् ॥१॥ वसन्ततिलकं वृत्तम् ।

प्रसरतीति । शशधरबिम्बे चन्द्रमण्डले प्रसरति उद्गच्छति, माधवे कृष्णे कृतविलम्बे आगमने विलम्बं कुर्वति च सति मधुरा मनोहारिणी राधा विरचितः विविधः विलापः परितापः यस्मिन् तद् यथा तथा उच्चैः परितापं चकार ॥ २ ॥ आर्यावृत्तम् ।

मालवरागेण [illegible] इति पाठान्तरम् । [illegible] रिजाते च तल्लक्षणं यथा । अथ मालवगौडेऽपि [illegible] कुले । [illegible] आरोहे [illegible] । आरोहे यदि [illegible] विधीयते ।

अथ त्रयोदशः प्रबन्धः ।

मालवरागयतितालाभ्यां गीयते ।

कथितसमयेऽपि हरिरहह ! न ययौ वनं
मम विफलमिदमनुरूपमपि यौवनम् ।
"यामि हे ! कमिह शरणं
सखीजनवचनवञ्चिता" । ध्रुवम् ॥ १ ॥
यदनुगमनाय निशि गहनमपि शीलितं
तेन मम हृदयमिदमसमशरकीलितं "यामि हे" ! ॥४॥
मम मरणमेव वरमतिवितथकेतना
किमिति विषहामि विरहानलमचेतना "यामि हे !" ॥५

रि म प नि ध ध नि प प म ग म रि म ग रि स ।
रि म प नि प नि ध रि स रि सा रि ग ग सा रि स ।
स नि प म प म म म रि म ग रि सा ॥

इति मालवगीतः । स्वरीकरणम् ।

कथितसमये इति । अहह इति खेदसूचकमव्ययं कथितसमये निर्दिष्ट-समयेऽपि हरिः वनं न ययौ न आगत इत्यर्थः एतत् अनुरूपं रूपयौवनमपि यौवनं विफलं व्यर्थं भूतमिति शेषः । हे नाथ ! इति सम्बोधनम् इह कं शरणं यामि, अहं सखीजनस्य वचनेन कृष्ण इह आयातीति रूपेण वञ्चिता विप्रलब्धा इत्यर्थः ॥ १ ॥

यदिति । यस्य कृष्णस्य अनुगमनाय प्राप्तये निशि रात्रौ गहनं निबिडमपि वनं शीलितम् आश्रितं तेन कृष्णेन कारणेन मम इदं हृदयम् असमशरेण पञ्चबाणेन कीलितं निखातकीलं निरतं विद्धमित्यर्थः ॥ ४ ॥

ममेति । मम मरणमेव वरं श्रेष्ठम् । अतिवितथम् अतिमिथ्या केतनं सङ्केतम् इत्यर्थः यस्याः तादृशी अचेतना कृष्णाप्राप्त्या

मामहह ! विधुरयति मधुरमधुयामिनी
कापि हरिमनुभवति कृतसुकृतकामिनी "यामि हे !" ॥ ६ ॥
अहह ! कलयामि वलयादिमणिभूषणम् ।
हरिविरहदहनवहनेन बहुदूषणम् "यामि हे !" ॥ ७ ॥
कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति मामतिविषमशीलया "यामि हे !" ॥ ८ ॥
अहमिह निवसामि नगणितवनवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा "यामि हे !" ॥ ९ ॥
हरिचरणशरणजयदेवकविभारती
वसतु हृदि युवतिरिव कोमलकलावती "यामि हे" ॥ १० ॥

इति त्रयोदशः प्रबन्धः ।

चैतन्यहीना च सती किमिति कथं विरहानलं निर्व्वापयिष्यामि कष्टं करोमि ॥ ५ ॥

मामिति । अहह ! अहो मधुरा मनोहारिणी मधुयामिनी वसन्तरात्रिः मां विधुरयति । व्याकुलयति । कापि कृतं सुकृतं यया तादृशी कामिनी हरिं कृष्णम् अनुभवति रमयतीत्यर्थः ॥ ६ ॥

अहहेति । अहह ! वलयादिमणिभूषणं कङ्कणादिरत्नालङ्कारं हरिविरहरूपे दहने वह्नौ सत्यपि वहनेन धारणेन बहुदूषणम् अधिकदोषावहं कलयामि मन्ये ॥ ७ ॥

कुसुमेति । हृदि हृदये स्रक् मालापि अतिविषमम् अतिदारुणं शीलं यस्याः तथाभूतया अतनुशरलीलया कामशरविलासेन कुसुमवत् सुकुमारी तनुर्यस्यास्तादृशीं मां हन्ति पीडयति ॥ ८ ॥

अहमिति । मधुसूदनः चेतसा मनसापि मां न स्मरति अतः अहं न गणितं न विचारितं वनवेतसं कष्टदायकमिति शेषः, यया तादृशी इह निवसामि च, पुनर्दुःखं गच्छामीति भावः ॥ ९ ॥

हरीति । हरिचरणमेव शरणम् आश्रयः यस्याः तथाभूत

तत् किं कामपि कामिनीमभिसृतः किंवा कलाकेलिभि
र्बद्धो बन्धुभिरन्धकारिणि वनोपान्ते किमुद्भ्राम्यति ।
कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः
सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः ॥ ११ ॥

अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ॥ १२ ॥

अथ चतुर्दशः प्रबन्धः ।

वसन्तरागेण एकतालीतालेन च गीयते ।

स्मरसमरोचितविरचितवेशा गलितकुसुमदलविलुलितकेशा ।

हरिकीर्तनपरा इत्यर्थः जयदेवस्य भारती वाणी कोमलकलावती रम-णीयकलानिपुणा युवतिरिव हृदि यथा तिष्ठतु ॥ १० ॥

कान्तविलम्बे तर्कयति तदिति । कान्तः कृष्णः सङ्केतीकृतं मञ्जु मनोज्ञं यत् वञ्जुललतानां वेतसलतानां कुञ्जं तस्मिन् अपि यत् न आगतः, तत् कामपि कामिनीं किम् अभिसृतः उपगतः ? किं वा बन्धुभिः कलाकेलिभिः कलानां वादित्रादीनां केलिभिः क्रीडाभिः बद्धः आयत्तीकृतः ? किं वा पथि किल क्लान्तम् आकुलं मनः अन्तःकरणं यस्य स क्लान्तमना सन् मनाक् अल्पमपि पथि प्रस्थातुम् अक्षमोऽपि अन्धकारिणि वनोपान्ते किमु किंवा भ्राम्यति ? ॥ ११ ॥ शार्दूलविक्रीडितं वृत्तम् ।

अथेति । अथ वितर्कानन्तरं माधवम् अन्तरेण विना आगताम् अतएव विषादेन मूकां जातमौनभावां सखीं वीक्ष्य इयं राधा जनार्दनं कयापि रमितं दृष्टवत् दृष्टमिव विशङ्कमाना सती एतत् आह ॥ १२ ॥ उपेन्द्रवज्रावृत्तम् ।

अथ वसन्तरागेण एकतालीतालेन च गीयते ।

स्मरेति । कापि अधिकगुणा अतिगुणवती चपला अधीरा युवतिः

'कापि चपला मधुरिपुणा विलसति युवतिरधिकगुणा' ११ ध्रु०

हरिपरिरम्भणवलितविकारा

कुचकलशोपरि तरलितहारा । "कापि" ॥ १४ ॥

विचलदलकललिताननचन्द्रा ।

तदधरपानरभसकृततन्द्रा । "कापि" ॥ १५ ॥

चञ्चलकुण्डलदलितकपोला ।

मुखरितरसनजघनगतिलोला । "कापि" ॥ १६ ॥

दयितविलोकितलज्जितहसिता ।

बहुविधकूजितरतिरसरसिता । "कापि" ॥ १७ ॥

स्मरसमरस्य उचितं यथा तथा विरचितः वेशः यया तथोक्ता तथा गलितेन सुरतश्रमवशेन कुसुमदलेन कुसुमकलया विलुलिताः केशा यस्याः तादृशी काचित् मधुरिपुणा कृष्णेन विलसति ॥ १३ ॥

हरीति । पूर्वोक्तां युवतिं विशिनष्टि हरीत्यादि । हरेः परिरम्भणेन वलितः प्रवृद्धः विकारः कामजनित इति भावः । यस्याः तादृशी तथा कुचकलशयोः स्तनकुम्भयोः उपरि तरलितः चञ्चलितः हारः यस्याः तथाभूता ॥ १४ ॥

विचलदिति । विचलद्भिः चञ्चलैः केशैः ललितः सुन्दरः आननमेव चन्द्रः यस्याः सा, तथा तस्य कृष्णस्य अधरपानरभसेन अधरपानावेगेन कृता तन्द्रा यस्याः तथाभूता ॥ १५ ॥

चञ्चलेति । चञ्चलाभ्यां रतिरभसेनेति भावः । कुण्डलाभ्यां दलितौ कपोलौ यस्याः सा तथा मुखरिता रसना काञ्ची यत्र तादृशी या जघनस्य गतिः तया लोला चपला ॥ १६ ॥

दयितेति । दयितस्य प्रियस्य विलोकितेन दर्शनेन लज्जितं लज्जायुक्तं हसितं यस्याः तथोक्ता तथा बहुविधं कूजितं यस्यां तादृशी या रतिः तस्याः रसेन आस्वादेन रसिता रसपूर्णा ॥ १७ ॥

विपुलपुलकपृथुवेपथुभङ्गा ।
श्वसितनिमीलितविकसदनङ्गा । "कापि" ॥ १८ ॥
श्रमजलकणभरसुभगशरीरा ।
परिपतितोरसि रतिरणधीरा । "कापि" ॥ १९ ॥
श्रीजयदेवभणितं हरिरमितम् ।
कलिकलुषं जनयतु परिशमितम् । "कापि" ॥ २० ॥

इति चतुर्दशः प्रबन्धः ।

विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम् ।
विधुरतीव तनोति मनोभुवः सुहृदये ! हृदये मदनव्यथाम् २१

विपुलेति । विपुलाः पुलका यस्मिन् तादृशः पृथुः महान् वेपथुः कम्पः तस्य भङ्गः कम्पच्छेदः यस्याः तयोक्ता तथा श्वसितेन निमीलितेन च विकसन् स्फुरन् अनङ्गः कामः यस्याः तथाभूता ॥ १८ ॥

श्रमेति । श्रमजनितेन जलकणभरेण स्वेदजलबिन्दुसमूहेन सुभगं शरीरं यस्याः सा तथा रतिरणे सुरतसंग्रामे धीरा सती कान्तस्य वक्षसि परिपतिता ॥ १९ ॥

श्रीति । श्रीजयदेवेन भणितं हरिरमितं हरेः सुरतं कलिकलुषं परिशमितं जनयतु ॥ २० ॥

विरहेति । सखे इति कोमलामन्त्रणे । हे सखि ! मनोभुवः कामस्य सुहृत् मित्रभूतः विरहेण मम विच्छेदेन पाण्डु यत् मुरारेः मुखाम्बुजं तस्येव द्युतिर्यस्य तथाभूतः अतएव वेदनां मनोव्यथां मुखादर्शनजनितामिति भावः । तिरयन् आच्छादयन् निराकुर्वन्नित्यर्थः चन्द्रदर्शनेन मुखसादृश्यदर्शनजनितानन्दलाभादिति भावः । विधुः हृदये अतीव मदनव्यथां तनोति विस्तारयति उद्दीपकत्वादिति भावः ॥ २१ ॥ द्रुतविलम्बितं वृत्तम् ।

अथ चतुर्दशः प्रबन्धः ।

गुर्जरीरागेण एकतालीतालेन च गीयते ।

समुदितमदने रमणीवदने चुम्बनवलिताधरे ।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ।
"रमते यमुनापुलिनवने विजयी मुरारिरधुना" "ध्रुवम्" ॥२२
घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ।
कुरवककुसुमं चपलासुषमं रतिपतिमृगकानने 'रमते' ॥२३

गुर्जरीरागेण एकतालीतालेन च गीयते ।

समुदितेति । अधुना विजयी जयशीलः सर्वोत्कर्षेणावस्थितः मुरारिः यमुनापुलिनवने यमुनायाः पुलिनवर्त्तिनि कानने समुदित सम्यक् वृद्धिं गतः मदनः येन तस्मिन् कामोद्दीपके इत्यर्थः, चुम्बनेन वलितः वक्रीकृतः अधरः यस्य तादृशे रमणीवदने कस्याश्चित् कामिन्याः वदने रजनीकरे चन्द्रे मृगमिव सपुलकं सरोमाञ्चं स्पर्शेन जातरोमाञ्चं यथा तथा मृगमदस्य कस्तूरिकायाः तिलकं लिखति ददाति रमते क्रीडति च तथेति शेषः एतेन अस्याः स्वाधीनभर्तृकात्वमुक्तम् तथाचोक्तं यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति । विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृकेति ॥ २२ ॥

घनेति । घनानां मेघानां चयः समूहः तद्वत् रुचिरे शोभने तरलितं चञ्चलितं तरुणानां यूनां आननं मुखं येन दर्शनार्थमिति भावः । तस्मिन् तथा रतिपतिः काम एव मृगः तस्य कानने विचरणस्थाने कामोद्दीपके इत्यर्थः तस्याः पूर्वोक्तायाः स्वाधीनपतिकायाः चिकुरे कुन्तले चपला विद्युत् तस्या इव सुषमा परमा शोभा यस्य तादृशं कुरवककुसुमं रचयति । मुरारिरिति पूर्वेण सम्बन्धः एवमुत्तरत्रापि बोद्धव्यमिति ॥ २३ ॥

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं तारकपटलं नखपदशशिभूषिते "रमते"॥२४॥
जितविसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले 'रमते'॥२५
रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरशनं तोरणहसनं विकिरति कृतवासने "रमते"२६
चरणकिसलये कमलानिलये नखमणिगणपूजिते ।
वहिरपवरणं यावकभरणं जनयति हृदि योजिते 'रमते'॥२७

घटयतीति । सुघने निविडे नखपदं नखक्षतमेव शशी चन्द्रः तेन भूषिते अलङ्कृते तथा मृगमदस्य कस्तूर्या या रुचि कान्तिः तया रूषिते शोभिते तस्याः कुचयुगमेव गगनं तस्मिन् अमलम् उज्ज्वलं मणिसरं मुक्ताहारमेव तारकाणां नक्षत्राणां पटलं राजिं घटयति ॥ २४ ॥

जितेति । जितं विसस्य मृणालस्य शकलं खण्डं येन तादृशे करतलमेव नलिनीदलं पद्मपत्रं यस्य तस्मिन् तथा हिमवत् शीतले मृदुनि भुजयुगले करद्वये मधुकराणां भ्रमराणां निचयं श्रेणिं मरकतनिर्मितवलयं वितरति परिधापयति ॥ २५ ॥

रतीति । विपुलम् अपघनं शरीरम् आयतनमित्यर्थः यस्य तादृशे विशाले इत्यर्थः, मनसिजस्य कामस्य कनकासने स्वर्णनिर्मितपीठस्वरूपे इत्यर्थः, तथा कृतं वासनं गन्धादिभिः संस्कारः यस्य तथाभूते सुगन्धद्रव्यादिभिः सुरभीकृते इत्यर्थः, तस्याः रतेः शृङ्गारस्य गृहम् आश्रय एव जघनं कटिपुरोभागः नितम्बो वा तस्मिन् तोरणस्य बहिर्द्वारे शोभार्थमालाया हसनम् उपहासकरं ततोऽप्यधिकसुन्दरमित्यर्थः मणिमयं रत्नमयं रशनं काञ्चीं विकिरति अर्पयति ॥ २६ ॥

चरणेति । कमलायाः लक्ष्म्याः निलये आधारे हृदि वक्षसि

रमयति सुभृशं कामपि सुदृशं खलहलधरसोदरे ।
किमफलमवसं चिरमिह विरसं वद सखि! विटपोदरे 'रमते'
इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके 'रमते' ॥२९

इति पञ्चदशः प्रबन्धः ।

नायातः सखि! निर्दयो यदि शठस्त्वं दूति! किं दूयसे
स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम् ।
पश्याद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं गुणै-
रुत्कण्ठार्त्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥ ३० ॥

योजिते विनिहिते नखा एव मणीनां गणाः तैः पूजिते चर्चिते तस्याः चरणकिसलये पदपल्लवे पल्लवरूपचरणे बाह्यशोभाजनकं याव-कमलस्य कमिव भूषणम् आभरणं जनयति अर्पयति ॥ २७ ॥

रमयतीति। हे सखि! खले धूर्ते हलधरस्य बलदेवस्य सोदरे भ्रातरि हलधरस्य हलमाहकस्य चेति शोकप्रतीतिश्च व्यज्यते । कृष्णे कामपि सुदृशं शोभननेत्रां कामिनीं सुभृशम् अत्युच्चं यथा तथा रमयति सति इह विटपोदरे लतागृहे अफलं निष्फलं विरसं रसवर्जितं यथा तथा किं कथम् अवसम् अवस्थिताऽस्मि वद कथय ॥२८॥

इहेति। रसभणने वरवर्णने कृतं कीर्त्तितं हरेर्गुणनं येन तादृशे, मधुरिपोः कृष्णस्य पदसेवके भक्ते इत्यर्थः कविनृपजयदेवके कविश्रेष्ठ जयदेवके कलियुगस्य चरितं दुरितं पापं न वसतु ॥ २९ ॥

इदानीं दुःखितां सखीमाश्वासयन्त्याह नेति । हे सखि! निर्दयः दयारहितः शठः यदि न आयातः, हे दूति! त्वं किं कथं दूयसे ? दुःखिता भवसि, बहवः वल्लभाः स्त्रियः यस्य सः कृष्णः स्वच्छन्दं रमते, तत्र ते तव किं दूषणं को दोषः? पश्य अवलोकय, अद्य दयितस्य प्रियस्य कृष्णस्य गुणैः सौन्दर्यादिभिः रज्जुभिश्चेति ध्वनिः; आकृष्यमाण-

अथ षोडशः प्रबन्धः ।

देशाख्यरागेण रूपकतालेन च गीयते ।

अनिलतरलकुवलयनयनेन तपति न सा किसलयशयनेन ।

"सखि ! या रमिता वनमालिना" । ध्रुवम् ॥ २१ ॥

विकसितसरसिजललितमुखेन ।

स्फुटति न सा मनसिजविशिखेन । "सखि ! या" ॥ २२ ॥

अमृतमधुरमृदुतरवचनेन ।

ज्वलति न सा मलयजपवनेन । "सखि ! या" ॥ २३ ॥

इदं चेतः चित्तम् उत्कण्ठा औत्सुक्यम् आर्त्तिः पीडा च तयोर्भरात् आतिशय्यात् हेतोः स्फुटत् विदलदिव क्षयं याति तदुत्प्रेक्षालङ्कारः भवेत् तस्मादपि नोत्प्रेक्षामकतस्य परात्मनेति तत्पश्यात् ॥ १० ॥ शार्दूलविक्रीडितं वृत्तम् ।

देशाख्यरागेण रूपकतालेन च गीयते ।

अनिलेति । हे सखि ! या अनिलेन वायुना तरले चञ्चले कुवलये नीलोत्पले इव नयने यस्य तादृशेन वनमालिना रमिता क्रीड़िता, सा किसलयशयनेन पल्लवशयनेन न तपति न सन्तापं गच्छति । अरमितेति पक्षे किसलयशयने नवपल्लवशय्यायाम् इति न तपति इति न अपितु तपत्येवेत्यर्थः ॥ ११ ॥

विकसितेति । विकसितं यत् सरसिजं पद्मं तद्वत् ललितं मुखं यस्य तेन वनमालिना रमितेति सर्वत्र योज्यं सा मनसिजविशिखेन कामशरेण न स्फुटति न विदीर्य्यते, अरमितेति पक्षे मनसिज-विशिखे कामशरे इति सप्तम्यन्तं कृत्वा पूर्ववत् नञद्वयेनान्वयः कार्य्यः एवं सर्वत्र ॥ १२ ॥

अमृतेति । अमृतवत् मधुरं मृदुतरं कोमलतरं वचनं यस्य तेन वनमालिना रमितेति पूर्ववत् सा मलयजपवनेन न ज्वलति न तप्यते ॥ १३ ॥

स्थलजलरुहरुचिकरचरणेन ।
लुठति न सा हिमकरकिरणेन । 'सखि ! या' ॥ १४ ॥
सजलजलदसमुदयरुचिरेण ।
दलति न सा हृदि विरहभरेण । 'सखि ! या' ॥ १५ ॥
कनकनिकषरुचिशुचिवसनेन ।
श्वसिति न सा परिजनहसनेन । 'सखि ! या' ॥ १६ ॥
सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन । 'सखि ! या' ॥ १७ ॥
श्रीजयदेवभणितवचनेन ।
प्रविशतु हरिरपि हृदयमनेन । 'सखि ! या' ॥ १८ ॥

इति षोडशः प्रबन्धः ।

स्थलेति । स्थलजलरुहवत् रुचिर्येषां तादृशाः करचरणा यस्य तादृशेनेति वनमालिनेत्यस्य विशेषणम् । सा हिमकरस्य चन्द्रस्य किरणेन न लुठति न भूतले पतति इत्यर्थः, यथास्मरं पूर्ववत् ॥ १४ ॥

सजलेति । सजलः जलपूर्णः यः जलधराणां समुदयः तद्वत् रुचिरेण सुन्दरेण । सा विरहभरेण हृदि न दलति न विदीर्यते ॥ १५ ॥

कनकेति । कनकस्य काञ्चनस्य निकषः कषणं तद्वत् रुचिर्यस्य तादृशं शुचि उज्ज्वलं वसनं यस्य तादृशेन । सा परिजनानां हसनेन उपहासेन न श्वसिति न कष्टम् अनुभवति यथास्मरं पूर्ववत् ॥ १६ ॥

सकलेति । सकलेषु भुवनजनेषु वरः श्रेष्ठः तरुणः तेन । सा अतिकरुणेन अतिशोकेन रुजं पीडां न वहति यथास्मरं पूर्ववत् ॥ १७ ॥

श्रीति । अनेन श्रीजयदेवेन भणितम् उक्तं यत् वचनं तेन हरिरपि हृदयं प्रविशतु ॥ १८ ॥

मनोभवानन्दन ! चन्दनानिल !
प्रसीद रे दक्षिण ! मुञ्च वामताम् ।
क्षणं जगत्प्राण ! विधाय माधवं
पुरो मम प्राणहरो भविष्यसि ॥ ३९ ॥

रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्दूरं दुनोति मनोगतम् ।
हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः ॥ ४० ॥

बाधां विधेहि मलयानिल ! पञ्चबाण !
प्राणान् गृहाण न गृहं पुनराश्रयिष्ये ।

इत्यतिं मलयानिलं प्रार्थयते मनोभवेति । हे मनोभवस्य आनन्दन ! आनन्दजनक ! चन्दनानिल ! प्रसीद प्रसन्नो भव, रे दक्षिण ! सरल इति ध्वनिः वामतां वक्रतां मुञ्च त्यज, हे जगत्प्राण ! क्षणं मम पुरः अग्रतः माधवं विधाय पश्चात् प्राणहरः भविष्यसि ॥ ३९ वंशस्थविलं वृत्तम् ।

रिपुरिति । अयं सखीभिः संवासः सहवासः रिपुः शत्रुरिव, हिमानिलः शीतलवायुः शिखी अग्निरिव, सुधारश्मिश्चन्द्रः विषमिव मम मनः दूरम् अत्यर्थं दुनोति सन्तापयति, हृदयम् अदये दयारहिते तस्मिन् जने एवं पुनः बलात् वलते गच्छति, तथा हि कुवलयदृशां नीलोत्पलाक्षीणां कामिनीनां कामः वामः वक्रः अतएव निकामम् अत्यर्थं यथा तथा निरङ्कुशः अवाध्यः स्वेच्छाचारित्वात् दुर्निवार इत्यर्थः ॥ ४० ॥ हरिणीवृत्तम् ।

बाधामिति । हे मलयानिल ! त्वं बाधां मनोव्यथां विधेहि जनय, हे पञ्चबाण ! काम ! प्राणान् गृहाण, पुनरहं न आश्रयिष्ये न गमिष्यामि, हे कृतान्तभगिनि ! यमसोदरे ! यमुने ! इत्यर्थः ते

किं ते कृतान्तभगिनि ! क्षमया तरङ्गै-
रङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥ ४१ ॥

सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादराद्
आनम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दीवरम् ।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरम्
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥ ४२ ॥

इति श्रीगीतगोविन्दे विप्रलब्धावर्णने नागरनारायणो
नाम सप्तमः सर्गः ॥ ७ ॥

तव क्षमया किं ? क्षमां मा कुरु, मम अङ्गानि सिञ्च, देहदाहः शरीर-सन्तापः शाम्यतु निवृत्तो भवतु ॥ ४१ ॥ वसन्ततिलकं वृत्तम् ।

सान्द्रेति । सान्द्रः घनः आनन्दो येषां तैः पुरन्दरादिभिरिन्द्रादिभिः दिविषदां देवानां वृन्दैः अमन्दादरात् अतिशयात् आनम्रैः सम्यक् नतैः मञ्जुः मुकुटस्थैरिन्द्रनीलमणिभिः मयूखैर्विशिष्टैः सन्दर्शितम् इन्दीवरं कान्त्या नीलोत्पलभ्रमः यत्र तादृशं तथा स्वच्छन्दं यथा तथा मकरन्दवत् सुन्दर्या गलन्त्या निःसरन्त्या चरणादिति भावः मन्दाकिन्या गङ्गया मेदुरं स्निग्धं श्रीगोविन्दस्य पदारविन्दं पादपद्मम् अशुभस्कन्दाय अशुभनिवारणाय वन्दामहे प्रणमामः ॥ ४२ ॥ शार्दूलविक्रीडितं वृत्तम् ।

इति सप्तमः सर्गः ।

अष्टमः सर्गः।

विलक्षलक्ष्मीपतिः।

अथ कथमपि यामिनीं विनीय स्मरशरजर्जरितापि सा प्रभाते
अनुनयवचनं वदन्तमग्रे प्रणतमपि प्रियमाह साभ्यसूयम्॥१॥

अथ सप्तदशः प्रबन्धः।

भैरवीरागयतितालाभ्यां गीयते।

रजनिजनितगुरुजागररागकषायितमलसनिमेषं
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम्।

अथेति। अथ अनन्तरं सा स्मरस्य कामस्य शरैः जर्जरितापि कथमपि अतिकष्टेन यामिनीं निनीय यापयित्वा प्रभाते अग्रे प्रणतम् अनुनयवचनं वदन्तम् अपि प्रियं साभ्यसूयं सेर्ष्यं यथातथा, आह उवाच॥१॥ पुष्पिताग्रावृत्तम्।

भैरवीरागेण यतितालेन च गीयते। भैरवीरागध्यानं यथा। सरोवरस्थे स्फटिकस्य मण्डपे। सरोरुहैः शङ्करमर्चयन्ती। तालप्रभेद प्रतिपन्नगीता गौरी तनुर्नारद भैरवीयम्॥ सङ्गीतपारिजातोक्तलक्षणं यथा। स-स्वरांशग्रहन्यासा भैरवी स्यात् ध-कोमला। रिपारोहे तु मन्यासा पञ्चमेनोभयोरपि। पञ्चमेनाप्यवरोहे तु सर्वदा सुखदायिनी।

स रि ग म प ध नि। स नि ध प म ग रि स। स रि म
म प म ग रि स म ग रि ग रि स नि ध नि सा। स म
म ग म ग म प म ग रि म। धा प म ग रि स ग रि नि
स ग म म ग म प म ग रि स ग ग म नि नि स म ग
रि स स ग रि स नि नि स स।

इति भैरवी। सर्वदा।

रजनीति। हरिहरीति। खेदसूचकमव्ययं हे माधव! याहि

हरिहरि ! याहि माधव ! याहि केशव ! मा वद कैतववादं
तामनुसर सरसीरुहलोचन ! या तव हरति विषादम् ॥२॥

कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम् ।
दशनवसनमरुणं तव कृष्ण ! तनोति तनोरनुरूपम् ॥
'हरिहरि ! याहि' ॥ ३ ॥

वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम् ।
मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखम् ॥
'हरिहरि ! याहि' ॥ ४ ॥

गच्छ हे केशव ! याहि गच्छ, द्विरुक्तिः कोपाधिक्यसूचिका । कैतववादं कपटवचनं मा वद, हे सरसीरुहलोचन पद्मनयन ! तां कान्ताम् अनुसर अनुगच्छ, या तव विषादं खेदं हरति । तद्वार्ताभिज्ञत्वे हेतुं दर्शयति रजनीति रजन्यां जनितेन गुरुणा दीर्घेण जागरेण रागेण तस्यामनुरागेण च कषायितम् आरक्तीभूतम् अलसः निमेषः यस्य तत् मान्थो निमीलनपरिश्रमः तथा उदितः प्रकटितः रसः सुरते अभिनिवेशः येन तथाभूतं तव नयनं स्फुटं व्यक्तम् अनुरागमिव वहति धारयति । एतेनास्याः खण्डितात्वं सूचितं तदुक्तं 'ज्ञाते-ऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति ॥ २ ॥

अन्यथापि जागरणादिभिर्नयनलौहित्यं स्यादित्याशङ्क्य तन्निवारयति कज्जलेति । हे कृष्ण ! तव अरुणं रक्तवर्णं दशनवसनं रदनच्छदम् अधरबिम्बं तव तनोः शरीरस्य अनुरूपं योग्यं कज्जलमलिनयोः विलोचनयोः नेत्रयोः तस्याः इति शेषः चुम्बनेन विरचितं नीलिम्नः रूपं तनोति विस्तारयति, विरचितं नीलिमरूपं यस्य तादृशं सत् तव तनोः अनुरूपं सादृश्यं तनोति वा अन्वयः ॥ ३ ॥

वपुरिति । तव वपुः शरीरं स्मरसङ्गरे कामसंग्रामे खरैः तीक्ष्णैः नखरैः क्षतानां रेखाः यस्मिन् तादृशं सत् मरकतशकले नीलमणिखण्डे

चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम्।
दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम्।
'हरिहरि! याहि' ॥ ५ ॥

दशनपदं भवदधरगतं मम जनयति चेतसि खेदम्।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम् ॥
'हरिहरि! याहि' ॥ ६ ॥

बहिरिव मलिनतरं तव कृष्ण! मनोऽपि भविष्यति नूनम्।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम्।
'हरिहरि! याहि' ॥ ७ ॥

कलिता निर्मिता या कलधौतस्य स्वर्णस्य लिपिरक्षरविन्यासः तस्याः इव तया इवेत्यर्थः करणे षष्ठी ज्ञेया। रचितमिति अध्याहार्यं रतेः सुरतव्यापारस्य जयलेखं विजयपत्रम् अनुगच्छति अनुकरोति ॥ ४ ॥

वने कण्टकादिभिर्गात्रघर्षणात् एवं सम्भवति न तु नखक्षतानीत्याशङ्कां निराकरोति चरणेति। इदं तव उदारं विशालं ... चरणकमलाभ्यां पादपद्माभ्यां तस्या इति भावः गलता स्रवता ... अलक्तकेन सिक्तम् अतएव बहिः हृदयात् बहिः प्रदेशे मदनद्रुमस्य हृदयस्थस्य कामद्रुमस्य नवं नूतनं किसलयपरिवारं पल्लवसमूहं दर्शयतीव प्रकटयतीव ॥ ५ ॥

दशनेति। भवतस्तव अधरगतं दन्तक्षतस्य दशनपदं तस्या दन्तक्षतचिह्नं मम चेतसि खेदं क्लेशं तापमित्यर्थः जनयति अतः कथं अधुनापि एवं भावान्तरे आपतितेऽपि तव एतत् वपुः शरीरं मया सह अभेदम् अभिन्नं कथयति सूचयति च अन्यथा त्वद्दशनक्षते तवैव पीडा भवेत् मम तु कथमिति भावः ॥ ६ ॥

अन्यथापि दशनक्षतं सम्भवति न तु अन्यनायिकासङ्गादित्याशङ्कां निराकरोति बहिरिति। हे कृष्ण! तव मनः अपि बहिरिव बाह्यशरीरमिव नूनं निश्चितं मलिनतरं भविष्यति। अथ अन्यथा इत्यर्थः

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम् ।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ।
'हरिहरि ! याहि' ॥ ८ ॥

श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम् ।
शृणुत सुधामधुरं विबुधा ! विबुधालयतोऽपि दुरापम् ।
'हरिहरि ! याहि' ॥ ९ ॥

इति अष्टमः प्रबन्धः ।

तदेवं पश्यन्त्याः प्रसरदनुरागं बहिरिव
प्रियापादालक्तच्छुरितमरुणच्छायि हृदयम् ।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव !
त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥ १० ॥

अनुगतं त्वदेकायत्तम् अपरनपरस्य बालस्य अपरैव दूनं मन्म्र मामित्यथ कथं वञ्चयसि प्रतारयसि ॥ ७ ॥

भ्रमतीति । भवान् अबलानां कामिनीनां कवलाय ग्रासाय वनेषु भ्रमति, अत्र विषये किं चित्रम् आश्चर्यम् ? तथा हि पूतनिकैव पूतना एव वधूवधेन स्त्रीवधेन निर्दयं दयारहितं बालचरितं तवेति शेषः प्रथयति प्रकटयति ॥ ८ ॥

श्रीति । हे विबुधाः ! विद्वांसः ! देवा वा, सुधावत् मधुरं विबुधालयतोऽपि सुरलोकेऽपि दुरापं दुर्लभं श्रीजयदेवेन भणितं रतिवञ्चितायाः खण्डितायाः प्रौढायाः युवत्याः विलापं शृणुत आकर्णयत ॥ ९ ॥

तदिति । हे कितव ! धूर्त ! प्रियायाः अन्यस्याः नायिकायाः पादालक्तेन चरणालक्तकरसेन छुरितं व्याप्तं सुतराम् अरुणं छायितम् तादृशं अरुणम् बहिः प्रसरन् अनुरागः यस्मात् तथाभूतमिव तव हृदयं पश्यन्त्याः अवलोकयन्त्याः मम अद्य त्वदालोकः तव दर्शनं प्रख्या

प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले ।
व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधानने
स्वादु स्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः ॥ ११ ॥

इति श्रीगीतगोविन्दे खण्डितावर्णने विलक्ष्यलक्ष्मीपतिर्नाम अष्टमः सर्गः ॥ ८ ॥

मार्गदिग्ध्यानस्य प्रचयस्य यः भरः आतिशय्यं तस्य भङ्गेन हेतुना यः काऽपि शोककारणे सन्त्यपीत्यर्थः किं कथं किमपीत्यव्ययम् अनिर्वचनीयामित्यर्थः लज्जां जनयति ॥ १० ॥ शिखरिणीवृत्तम् ।

सर्गान्ते मङ्गलमाचरति प्रातरिति । प्रातःकाले नीलनिचोलं नीलवसनं तथा उरसि संवीतम् आच्छादितम् पीतं अंशुकं येन तम् अत एव चकितम् अपरनायिकावसनग्रहणात् अपराधस्य व्यक्ततया शंकितं यावत् अच्युतं कृष्णं विलोक्य राधायाः सखीमण्डले सखीसमूहे स्वैरं मन्दं यथा तथा हसति सति व्रीडया लज्जया चञ्चलं यथा तथा अञ्चलं वसनप्रान्तं नयनयोः आधाय वसनप्रान्तेन नयने आच्छाद्य इत्यर्थः राधाया आनने मुखे स्वादु सुन्दरं स्मेरम् ईषद्धास्ययुक्तं मुखं यस्य तादृशः अयं नन्दात्मजः कृष्णः जगताम् आनन्दाय अस्तु भवतु ॥ ११ ॥ शार्दूलविक्रीडितं वृत्तम् ।

इति अष्टमः सर्गः ।

अथ नवमः सर्गः ।

मुग्धमुकुन्दः ।

अथ तां मन्मथखिन्नां रतिरसभिन्नां विषादसम्पन्नाम् ।
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः सखी ॥१॥

अथ अष्टादशः प्रबन्धः ।

गुर्जरीरागयतितालाभ्यां गीयते ।

हरिरभिसरति वहति मधुपवने
किमपरमधिकसुखं सखि ! भवने ।
'माधवे मा कुरु मानिनि ! मानमये !' । ध्रुवम् ॥ २ ॥

इदानीं कृष्णविच्छेदेन खिद्यमानां राधां सखी प्राह अथेति । अथ अनन्तरं सखी रहः विजने वाक्यमेतत् मन्मथेन कामेन खिन्नां सन्तप्तां रतिरसेन सुरतजनितेन आनन्देन भिन्नां विरहितां विषादेन दुःखेन सम्पन्नां ताम् अनुचिन्तितं हरेः कृष्णस्य चरितं परनारीसङ्गमरूपं यया ताम् अतएव कलहान्तरितां कलहेन अन्तरितां व्यवहितां राधां उवाच । कलहान्तरितालक्षणमुक्तं भरतेन यथा । प्राणेश्वरं प्रणयकोपवशेन यस्य तं चाटुकारमपि रोषवशादपास्य पश्चात् । संतप्यते मदनवह्निविषादखेदैर्विकलाकुलात् कलहान्तरितेति सा कथिता ॥ १ ॥ अष्टादशमाह ।

गुर्जरीरागेण यतितालेन च गीयते ।

हरिरिति । सखे ! मानिनि ! मानवति राधे ! मधुपवने वसन्तसमीरे वहति सति हरिः कृष्णः अभिसरति तव गृहं सङ्केतस्थानमायाति तस्मात् माधवे मानं मा कुरु हे सखि ! भवने गृहे कृष्णवियोगे इति भावः अपरम् अस्मात् अधिकसुखं किम् अस्तीति शेषः न किमपीत्यर्थः ॥ २ ॥

तालफलादपि गुरुमतिसरसम् ।
किं विफलीकुरुषे कुचकलशम् । 'माधवे' ॥ ३ ॥
कति न कथितमिदमनुपदमचिरम् ।
मा परिहर हरिमतिशयरुचिरम् । 'माधवे' ॥ ४ ॥
किमिति विषीदसि रोदिषि विकला
विहसति युवतिसभा तव सकला । 'माधवे' ॥ ५ ॥
मृदुनलिनीदलशीतलशयने ।
हरिमवलोकय सफलय नयने । 'माधवे' ॥ ६ ॥
जनयसि मनसि किमिति गुरुखेदम् ।
शृणु मम वचनमनीहितभेदम् । 'माधवे' ॥ ७ ॥

तालेति । तालफलात् अपि गुरु स्थौल्येन काठिन्येन वर्तुलत्वेन च मध्ये अतिसरसं रसभरपूर्णं कुचकलशं स्तनकुम्भं किं कथं विफलीकुरुषे व्यर्थयसि ? कृष्णस्य करकमलमर्दनराहित्यादिति भावः ॥ ३ ॥

कतीति । इदम् अनुपदं पदे पदे अचिरं शश्वदेव कति न-वारं न कथितं मया इति शेषः. वारं वारं पदे पदे मया इदं कथितमित्यर्थः किमित्याह मेति। अतिशयरुचिरम् अतिसुन्दरं हरिं मा परिहर न त्यज ॥ ४ ॥

किमिति । विकला अतिव्याकुला सती किमिति कथं विषीदसि विषादं प्रकाशयसि, रोदिषि च । सकला युवतिसभा कामिनीवर्गः तव हसति तवेति सम्बन्धविवक्षया षष्ठी ॥ ५ ॥

मृद्विति । मृदुभिः कोमलैः नलिनीदलैः शीतले शयने हरिं कृष्णम् अवलोकय, पश्य, नयने नेत्रे सफलय चरितार्थे कुरु च ॥ ६ ॥

जनयसीति । हे राधे ! मनसि गुरुखेदं महद् दुःखं किमिति कथं जनयसि उत्पादयसि धारयसीत्यर्थः, अनीहित: अनभिलषितः भेदः विरहः यस्य तादृशं, यथा युवयोर्विरहः न भूयात् तथाविधं, मम वचनं शृणु ॥ ७ ॥

हरिरुपयातु वदतु बहुमधुरम्।
किमिति करोषि हृदयमतिविधुरम्। 'माधवे' ॥८॥
श्रीजयदेवभणितमतिललितं
सुखयतु रसिकजनं हरिचरितम्। 'माधवे' ॥९॥

इति अष्टादशः प्रबन्धः।

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये।
तद्युक्तं विपरीतकारिणि! तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥१०॥
अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसनः

हरिरिति। हरिः उपयातु तव समीपमागच्छतु, बहु मधुरं मनोहरं वचनं वदतु च। किमिति कथं हृदयम् अतिविधुरम् अतिव्याकुलं करोषि? तव व्याकुलीभावो निष्फल इति भावः ॥८॥

श्रीति। श्रीजयदेवेन भणितम् अतिललितम् अतिमनोहरं हरिचरितं कृष्णचरित्रं रसिकजनं सुखयतु सुखीकरोतु ॥९॥

स्निग्धे इति। हे राधे! तस्मिन् प्रिये कान्ते स्निग्धे स्नेहं दर्शयति अपि यत् परुषा निष्ठुरा कटुभाषिणीत्यर्थः असि, प्रणमति अपि यत् स्तब्धा निश्चला अनवनताङ्गा इत्यर्थः असि, रागिणि अनुरागवति अपि यत् द्वेषस्था विद्वेषिणी असि, उन्मुखे अभिमुखे अपि विमुखतां प्रतिकूलतां याता प्राप्ता असि, तस्मात् हे विपरीतकारिणि! प्रतिकूलवर्तिनि! तव श्रीखण्डचर्चा चन्दनविलेपनं विषं, शीतांशुः चन्द्रः तपनः सूर्यः; हिमं हुतवहः अग्निः तथा क्रीडया मुदः आमोदाः यातनाः इति यत् तत् युक्तम् उचितम्। विपरीतगुणैः सर्वमेव विपरीतं भवतीति भावः ॥१०॥ शार्दूलविक्रीडितं वृत्तम्।

वक्ष्यति नायिका यत्नं उपायमिति अन्तरिति। कृष्णस्तु:

स्त्र्याकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशाम् ।
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोर्व्यपोहयतु वोऽश्रेयांसि वंशीरवः ॥ ११ ॥

इति श्रीगीतगोविन्दे कलहान्तरितावर्णने
मुग्धमुकुन्दो नाम नवमः सर्गः ॥ ९ ॥

अथ दशमः सर्गः ।

चतुरचतुर्भुजः ।

अत्रान्तरे मसृणरोषवशामसीम-
निश्वासनिःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां दिनान्ते
सानन्दगद्गदपदं हरिरित्युवाच ॥ १ ॥

हरिणाक्षीणाम् अन्तर्मोहनेन मनोहरेण मोहितपुंनेन साधु साधु इति शिरःकम्पनेन वर्षतां मन्दाराणां देवतरुविशेषकुसुमानां विकम्पनः शिरसः स्तुतिकारकः स्वस्य अनिच्छतोऽपि आकर्षणे तथा दृष्टिहर्षणे नेत्रानन्ददाने महामन्त्रः तथा दृप्यद्भिः दर्पपूर्णैः दानवैः दूयमानाः पीड्यमाना ये दिविषदः देवाः तेषां दुर्वाराणां दुःखापदां भ्रंशः निवारकः वंशीरवेणैव दानवानां पराजयादिति भावः कंसरिपोः कृष्णस्य वंशीरवः वः युष्माकम् अश्रेयांसि अशुभानि व्यपोहयतु निराकरोतु श्रेयांसीति पाठे व्यपोहयतु वहं करोतु इत्यर्थः धातूनामनेकार्थत्वात् अपवर्गमोक्षाद्येति ज्ञेयम् । शार्दूलविक्रीडितं वृत्तम् ।

अत्रेति । अत्र अस्मिन् अन्तरे अवसरे दिनान्ते सन्ध्यायां हरिः कृष्णः मसृणस्य अल्पस्य निर्विषस्य रोषस्य वशात् अधीनां प्रायशो विसदृशापाङ्गवर्णः असीमनिश्वासेन पुनः पुनः निश्वासेन निःसह

अथ एकोनविंशः प्रबन्धः ।

देशवराडीरागेण रूपकतालेन च गीयते ।

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी
हरति दरतिमिरमतिघोरम् ।
स्फुरदधरसीधवे तव वदनचन्द्रमा
रोचयति लोचनचकोरम् ।
'प्रिये ! चारुशीले ! मुञ्च मयि मानमनिदानं
सपदि मदनानलो दहति मम मानसम् ।
देहि मुखकमलमधुपानम्' । ध्रुवम् ॥ २ ॥

विषादपूर्णं मुखं यस्याः तां तथा चकोरं चञ्चलं यथा तथा ईषितं तस्या वदनं यथा तथोक्तौ हरौ प्रणयितरदितमितवत्यः कुर्वती राधां अपेक्ष्य मानबन्धानि मन्दानि चन्द्रिकाविकासानि चाटूनि अपूर्तिकर्माणि यत्र तद् यथा तथा इति वक्ष्यमाणं वचनमुवाच ॥ १ ॥
वसन्ततिलकं वृत्तम् ।

देशवराडीरागेण रूपकतालेन च गीयते ।

वदसीति । हे चारुशीले ! मनोरमचरित्रे प्रिये ! मयि अनिदानम् अहेतुकं मानं कोपं मुञ्च, मानः कोपः न तु ईर्ष्या मयापराधो कृत इति पूर्ववत्कारः, मदनानलः कामाग्निः सपदि झटिति मम मानसं दहति, तस्मात् मुखमेव कमलं पद्मं तस्य मधुपानं देहि मुखपद्ममधु पाययेत्यर्थः मधुपानस्य अग्निदाहनिवारकत्वादिति भावः, यदि किञ्चिदपि वदसि कथयसि तदा तव दन्तानां रुचिः दीप्तिरेव कौमुदी ज्योत्स्ना अतिघोरं दरः भयमेव तिमिरं तत् हरति, किञ्च तव वदनचन्द्रमाः मुखचन्द्रः स्फुरतः दीप्यमानस्य अधरस्य सीधवे अमृताय अमृतपानार्थमित्यर्थः मम लोचनमेव चकोरं पक्षिविशेषं रोचयति कामयते सतृष्णं करोतीत्यर्थः ॥ २ ॥

सत्यमेवासि यदि सुदति! मयि कोपिनी
देहि खरनयनशरघातम्।
घटय भुजबन्धनं जनय रदखण्डनं
येन वा भवति सुखजातम्। "प्रिये!" ॥ ३ ॥
त्वमसि मम भूषणं त्वमसि मम जीवनं
त्वमसि मम भवजलधिरत्नम्।
भवतु भवतीह मयि सततमनुरोधिनी
तत्र मम हृदयमतियत्नम्। "प्रिये!" ॥ ४ ॥
नीलनलिनाभमपि तन्वि! तव लोचनं
धारयति कोकनदरूपम्।

सत्यमिति। हे सुदति शोभनदशने! यदि सत्यमेव मयि कोपिनी असि, तदा खराः तीक्ष्णाः नखरा एव शराः तैः घातं प्रहारं देहि, भुजाभ्यां बन्धनं घटय, कुरु, तथा रदैः दन्तैः खण्डनं दंशनं जनय कुरु, येन अन्येन प्रकारेण पादप्रहारादिना सुखजातं सुखसमूहं तवेति शेषः भवति तत् कुरु इत्यन्वयः। प्रभवोऽपि अपराधिषु किङ्करेषु प्रहरन्तीति विदितमेवेति भावः ॥ ३ ॥

नाहं तव प्रभुः त्वं मम प्रभुःइति दर्शयन्नाह त्वमसीति। हे राधे! त्वं मम भूषणम् अलङ्कारः असि, त्वं मम जीवनं प्राणभूतासि, किञ्च भवजलधौ संसारसागरे रत्नं सर्वश्रेष्ठवस्तु च असि जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते। इति कोषः तस्मात् भवती इह अस्मिन् त्वं प्रणयरत्ने इति भावः, मयि सततं अनुरोधिनी अनुवर्तिनी भवतु, तत्र तव आनुकूल्ये मम हृदयम् अतियत्नं अतियत्नवत् तवानुकूल्यसाधने सततं यत्नविशिष्टं ॥ ४ ॥

नीलेति। हे तन्वि! कृशाङ्गि! नीलनलिनाभं नीलकमलसदृशम् अपि तव लोचनं नयनं कोकनदरूपं रक्तोत्पलसादृश्यं धारयति,

कुसुमशरबाणभावेन यदि रञ्जयसि
कृष्णमिदमेतदनुरूपम्। "प्रिये!" ॥ ५ ॥
स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु तव हृदयदेशम्।
रसतु रसनापि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशम्। "प्रिये!" ॥ ६ ॥
स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम्।
भण मसृणवाणि! करवाणि चरणद्वयं
सरसलसदलक्तकरागम्। "प्रिये!" ॥ ७ ॥



रोषादिति भावः, किन्तु कुसुमं शरः यस्य सः कामस्तस्य यः बाणः कुसुमनिर्मितः तस्मात् भावः उत्पत्तिर्यस्य तेन अधुना रञ्जयसि यदि कृष्णं मांसमेतत् नयनं रञ्जयति मधुपानेन नेत्रयोर्लौहित्यप्रसादादिति भावः, तदा एतत् रञ्जनम् अनुरूपं योग्यं भवति तस्मात् रोषं त्यक्त्वा मधुपानेन नयनं रञ्जय इति भावः ॥ ५ ॥

स्फुरतीति। हे राधे! तव कुचकुम्भयोः स्तनकलसयोः उपरि मणिमञ्जरी रत्नहारः स्फुरतु विराजतां, तव हृदयदेशं प्रान्तभागं रञ्जयतु शोभयतु च। किञ्च तव घने निविडे जघनमण्डले रसना काञ्ची अपि रसतु ध्वनतु, मन्मथस्य कामस्य निदेशं शासनं घोषयतु च प्रचारयतु च ॥ ६ ॥

स्थलेति। हे मसृणवाणि मृदुमधुरभाषिणि! भण कथय स्थलकमलानां स्थलपद्मानां गञ्जनं तिरस्कारकं, मम हृदयस्य रञ्जनं शोभाकरं, जनितः कृतः रतिरङ्गे सुरतोत्सवे परभागः उत्कर्षः येन तादृशं तव चरणद्वयं सरसेन आर्द्रेण लसता दीप्यमानेन अलक्तकेनेत्यर्थः, अलक्तकेन शोभनः रागः लौहित्यं यस्य तथोक्तं सुरञ्जितमित्यर्थः करवाणि ॥ ७ ॥

स्मरगरलखण्डनं मम शिरसि मण्डनं
देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदनानलो
हरतु तदुपहितविकारम् । "प्रिये !" ॥ ८ ॥

इति चटुलचाटुपटुचारु मुरवैरिणो
राधिकामधिवचनजातम् ।
जयति जयदेवकविभारती भूषितं
मानिनीजनजनितशातम् । "प्रिये !" ॥ ९ ॥

इति एकोनविंशः प्रबन्धः ।

परिहर कृतातङ्के ! शङ्कां त्वया सततं घन-
स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि ।

स्मरेति । हे राधे ! मम शिरसि स्मरगरलखण्डनं कामकाल-कूटदमनम् उदारम् उत्कृष्टं तव पदपल्लवं मण्डनं भूषणस्वरूपं देहि अर्पय दारुणः भीषणः मदनकदनानलः कामसन्तापाग्निः मयि ज्वलति, तेन कामसन्तापाग्निना उपहितं जनितं विकारं मदीयेति शेषः हरतु मच्छिरसि तव पदपल्लवदानं कर्त्तृ इति शेषः ॥ ८ ॥

इतीति । इति उक्तप्रकारेण जयदेवकविना भूषितम् अलङ्कृतं मानिनीजनानां मानवतीनां नारीणां जनितं शातं सुखं येन तादृशं [illegible] । राधिकाम् अधि राधामधिकृत्य इत्यर्थः, चटुलं चातुर्य्ययुक्तं चाटु प्रीतिकरं पटु कौशलपूर्णं चारु मनोहरं मुरवैरिणः कृष्णस्य वचनजातं वाक्यसमूहः जयति सर्वोत्कर्षेण वर्त्तते ॥ ९ ॥

परिहरेति । हे कृतातङ्के ! कृतः आतङ्कः सन्देहो यया सा तत्सम्बुद्धौ, शङ्कां मम अन्यःस्त्रीजनितामिति भावः परिहर त्यज । घने निविडे स्तनजघने यस्याः तादृश्या त्वया सततं नद्ध व्याप-

विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
स्तनभरपरीरम्भारम्भे विधेहि विधेयताम् ॥ १० ॥

मुग्धे! विधेहि मयि निर्दयदन्तदंश-
दोर्वल्लिबन्धनिबिडस्तनपीडनानि।
चण्डि! त्वमेव मुदमञ्च न पञ्चबाण-
चण्डालकाण्डदलनादसवः प्रयान्ति ॥ ११ ॥

शशिमुखि! तव भाति भङ्गुरभ्रूर्युवजनमोहकरालकालसर्पी।
तदुदितभयभञ्जनाय यूनां त्वदधरसीधुसुधैव सिद्धमन्त्रः ॥ १२ ॥

मिति भावः, क्रान्ते आक्रान्ते व्याप्ते अतएव परावकाशाभि अन्यावकाशरहिते मनसि ममेति भावः। वितनोः अनङ्गादन्यः कोऽपि धन्यः जनः न प्रविशति त्वदाक्रान्ततया अन्यस्य प्रवेशः नायिकान्तरस्य प्रवेशानवकाशात् अशरीरतया केवलं काम एव मम चेतसि प्रविशतीत्यर्थः। तस्मात् स्तनभरेण परीरम्भस्य आश्लेषस्य आरम्भे उपक्रमे मम अन्तरं विधेयतां वश्यतां विधेहि प्रापय वशं नयेत्यर्थः। आलिङ्ग्य पाहीति भावः ॥ १० ॥ हरिणीवृत्तम्।

मुग्धे इति। हे मुग्धे! मयि निर्दयं निष्ठुरं यथा तथा दन्तदंशं दशनक्षतं तथा दोर्वल्लिबन्धं भुजलताबन्धनं निबिडाभ्यां स्तनाभ्यां पीडनानि च विधेहि कुरु। हे चण्डि! कोपने! त्वमेव मम मुदं हर्षम् अञ्च जनय, पञ्चबाण एव चण्डालः तस्य काण्डदलनात् शरप्रहारात् मम असवः प्राणाः प्रयान्ति गच्छन्ति तस्मात् अयि प्रसीदेति भावः ॥ ११ ॥ वसन्ततिलकं वृत्तम्।

शशिमुखीति। हे शशिमुखि! चन्द्रवदने! तव भङ्गुरा कुटिला भ्रूः युवजनानां तरुणानां मोहे मूर्च्छाविधाने कराला भीषणा कालसर्पी कृष्णभुजङ्गीस्वरूपा भाति विराजते। यूनां तस्याः कालसर्पीभूतायाः भ्रुवः भयभञ्जनाय भीतिनिवारणाय तव अधरसम्भूता सुधा एव सिद्धमन्त्रः

व्यथयति वृथा मौनं तन्वि ! प्रपञ्चय पञ्चमं
तरुणि ! मधुरालापैस्तापं विनोदय दृष्टिभिः।
सुमुखि ! विमुखीभावं तावद्विमुञ्च न वञ्चय
स्वयमतिशयस्निग्धो मुग्धे ! प्रियोऽहमुपस्थितः ॥ १३ ॥
बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि
र्गण्डश्चण्डि ! चकास्ति नीलनलिनश्रीमोचनं लोचनम्।
नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति ! प्रिये !
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ॥ १४ ॥

तवाधरामृतपानेनैव तद् भयं निवर्त्तते इति भावः ॥ १२ ॥ पुष्पिताग्राहत्तम्।

व्यथयेति। हे तन्वि ! कृशाङ्गि ! वृथा अकारणं मौनं तूष्णीम्भावः तवेति शेषः, मां व्यथयति तापयति, हे तरुणि ! मधुरैः आलापैः भाषितैः पञ्चमं रागं प्रपञ्चय प्रकटय पञ्चमरागेण मधुरभाषय इत्यर्थः दृष्टिभिः तापं विनोदय शमय, हे सुमुखि ! विमुखीभावं दैन्यं निराकरणकाङ्क्षामिति भावः, विमुञ्च त्यज न वञ्चय न प्रतारय मामिति शेषः, हे मुग्धे ! मूढे ! अतिशयस्निग्धः अतिप्रेमवान् प्रियः प्रीतिकरः अहं स्वयं विना आह्वानमिति भावः, उपस्थितः आगतः। तस्मात् मां न प्रत्याख्याहीति भावः ॥ १३ ॥ हरिणीवृत्तम्।

सम्प्रति मानभञ्जनेन प्रशंसयाह बन्धूकेति। हे चण्डि ! कोपने ! अयम् बन्धूकस्य पुष्पविशेषस्य या द्युतिः कान्तिः तस्या बान्धवः बन्धूककुसुमसदृश इत्यर्थः स्निग्धः तव अधरः, मधूकवत् छविदीप्तिर्यस्य तादृशः गण्डः कपोलः तथा नीलनलिनस्य नीलकमलस्य श्रीमोचनं शोभाचौरं लोचनं चकास्ति शोभते। हे कुन्दाभदन्ति ! कुन्दकुसुमदशने ! तव नासा नासिका तिलप्रसूनस्य तिलपुष्पस्य पदवीं अभ्येति तिलपुष्पसदृशी प्रतीयते, हे प्रिये ! तस्मात् स पुष्पायुधः कामः

दृशौ तव मदालसे वदनमिन्दुमत्यान्वितं
गतिर्जनमनोरमा विजितरम्भमूरुद्वयम् ।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवौ
अहा विबुधयौवनं वहसि तन्वि ! पृथ्वीगता ॥ १५ ॥

प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे
राधापीनपयोधरस्मरणकृत् कुम्भेन सम्भेदवान् ।
यत्र स्विद्यति मीलति क्षणमपि क्षिप्रं तदालोकनात्
व्यामोहेन जितं जितं जितमभूद् व्यालोलकोलाहलः ॥१६॥

इति श्रीगीतगोविन्दे मानिनीवर्णने चतुरचतुर्भुजो
नाम दशमः सर्गः ॥ १० ॥

भावः बाहुल्येन त्वन्मुखदर्शनात् तव मुखाराधनेन चित्तं विनयते कायश्च विनयते तव कुचमेव आश्रयति इत्यर्थः ॥ १४ ॥ शार्दूल-विक्रीडितं वृत्तम् ।

दृशाविति । हे तन्वि ! सुन्दरि ! तव दृशौ नयने मदेन अलसे मन्थरे, वदनम् इन्दुमत्या चन्द्रकान्त्या अन्वितं युक्तं चन्द्र इति बुद्धिं जनयति इति भावः । गतिः गमनं जनानां मनोरमा मनोहारिणी, ऊरुद्वयं ऊरुयुगलं, विजिता तिरस्कृता रम्भा कदली येन तथाभूतं कदलीदर्पनिन्दकं, तव रतिः सुरतविहारः कलावती कौशलयुक्ता इत्यर्थः, भ्रुवौ च रुचिरा मनोहारिण्यौ चित्रा चमत्कारिण्यौ लेखा ययोः तादृशौ, अहो आश्चर्यं, त्वं पृथ्वीगता भूस्थापि विबुधयौवनं विबुधयुवतीनां भावं सुरसुन्दरीरूपनिन्दकं वहसि धारयसि ॥ १५ ॥ पृथ्वीछन्दः ।

वक्ष्यति कुवलयापीडवधसंस्मरणरसं प्रीतिमिति । सः कुवलया-पीडेन मदान्धेन कंसस्य हस्तिना सार्धं रणे संग्रामे कुम्भेन गजे-न्द्रेणेति भावः, सम्भेदवान् संसर्गी सन् राधायाः पीनयोः पयोधरयोः

करपाततः कुवलयापीडस्य कुम्भस्पर्शेन राधास्तनस्पर्शस्मृतिमान् इत्यर्थः, ततश्च पश्चे बाहुमे तस्मिन् हस्तिनि विध्यति भयं प्राप्नुवति चिरं गीष्मं मीलति म्रियमाणे च सति तदावलोकनात् तद्दर्शनात् च च जितं जितं जितं कंसो जितः कंसो जित इत्येवं व्यामोहेन जनता-कलकलेन व्याकोचः विस्तारं गतः कोलाहलः कलरवः यस्मात् तथाभूतः अभूत् सः हरिः वः युष्माकं प्रीतिं ममतां विस्तारयतु ॥ १६ ॥ शार्दूल-विक्रीडितं वृत्तम् ।

अथ एकादशः सर्गः ।

सानन्ददामोदरः ।

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं
गतवती कृतवेशे केशवे कुञ्जशय्याम् ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां कापि राधां जगाद ॥ १ ॥

अथ विंशतितमः प्रबन्धः ।

वसन्तरागयतितालाभ्यां गीयते ।

सुचिरमिति । कापि सखी दृष्टिं चक्षूंषि चोरयतीति तथोक्ते दर्शनतस्करे प्रदोषे रजनीमुखे स्फुरति दीप्यमाने वर्द्धमाने इत्यर्थः, सति सुचिरं दीर्घकालं अनुनयेन मृगाक्षीं राधां प्रीणयित्वा सन्तोष्य कृतवेशे रचितशृङ्गारयोग्यपरिष्कारे केशवे तस्मे कुञ्जशय्यां गता-वच्छविरचितशयनं गतवति सति निरवसादाम् अखेदेन अनायरहि-ताम् अतएव रचिता रुचिरा मनोहारिणी भूषा यया तथाभूता या तां राधां जगाद बभाषे ॥ १ ॥ मालिनीवृत्तम् ।

वसन्तरागेण यतितालेन च गीयते ।

विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम् ।
सम्प्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम् ।
"मुग्धे ! मधुमथनमनुगतमनुसर राधिके !" । ध्रुवम् ॥ २ ॥
घनजघनस्तनभारभरे ! दरमन्थरचरणविहारम् ।
मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम् 'मुग्धे !'३
शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावम् ।
कुसुमशरासनशासनवन्दिनि पिकनिकरे भज भावं 'मुग्धे !'४

विरचितेति । हे मुग्धे ! मूढे ! राधिके ! सम्प्रति विरचितानि कृतानि चाटूनि प्रियाणि वचनरचनानि वाक्यविन्यासा येन तं चरणयोः रचितः कृतः प्रणिपातः येन तथोक्तं पदानतमित्यर्थः मञ्जुलानां मनोज्ञानां वञ्जुलानां वेतसानां सीमनि प्रदेशे केलिशयनं विहारशय्याम् अनुयातम् अनुगतम् मत्पश्चादागतं मधुमथनं कृष्णं अनुसर अभिगच्छ ॥ २ ॥

घनेति । हे घनजघनस्तनभारभरे ! घनयोर्निबिडयोः जघनस्तनयोर्भारस्य भरः अतिशयः यस्याः तत्सम्बुद्धौ, दरमन्थरः ईषन्मन्दः चरणविहारः पादविक्षेपः यत्र तत् तथा मुखरितः शब्दितः मणिमञ्जीरः रत्ननूपुरः यत्र तत् यथा तथा उपैहि कृष्णमुपगच्छ, मरालानां राजहंसानां विकारं व्यवहारं विधेहि कुरु मरालवत् गच्छ इत्यर्थः ॥ ३ ॥

शृण्विति । रमणीयतरम् अतिमनोहरं तरुणीजनानां युवतीनां मोहनं मधुरिपोः कृष्णस्य रावं वचनं वेणुनादमित्यर्थः शृणु । तथा कुसुमं शरासनं धनुर्यस्य तस्य कामदेवस्य शासनं आदेशं वन्दते प्रतिपालयतीति तथोक्ते पिकानां कोकिलानां निकरे समूहे भावम् अनुरागं भज इदानीं कृष्णेन कोकिलारावं शृणु इत्यर्थः ॥ ४ ॥

अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बं
प्रेरणमिव करभोरु ! करोति गतिं प्रति मुञ्च विलम्बं 'मुग्धे' !'५

स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम् ।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम् "मुग्धे" ॥६॥

अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम् ।
चण्डि ! रणितरसनारवडिण्डिममभिसर सरसमलज्जम् 'मुग्धे'

स्मरशरसुभगनखेन करेण सखीमवलम्ब्य सलीलम् ।
चलवलयक्वणितैरवबोधय हरिमपि निजगतिशीलम् 'मुग्धे' ! ८

अनिलेति । हे करभोरु ! कनिष्ठाङ्गुलितः मणिबन्धपर्यन्तः करस्य बहिर्भागः करभः, मणिबन्धादाकनिष्ठं करस्य करभो बहिरित्यमरः । तद्वत् ऊरू यस्यास्तत्सम्बुद्धौ, लतानिकुरम्बं लताकुञ्जं अनिलेन वायुना तरलः चञ्चलः यः किसलयनिकरः पल्लवसङ्घातः तेन तद्रूपेणेत्यर्थः करेण तव गतिं गमनं प्रति प्रेरणमिव, करोति तस्मात् विलम्बं मुञ्च त्यज विलम्बं मा कुरु इत्यर्थः ॥ ५ ॥

स्फुरितेति । अनङ्गवशात् कामतरङ्गहेतोरिव स्फुरितं कम्पितं अतएव सूचितः प्रकटितः हरेः कृष्णस्य परिरम्भः आलिङ्गनं येन तथोक्तं तथा मनोहरः हार एव विमला स्वच्छा जलधारा यस्य तादृशं अमुं कुचकुम्भं कलशद्वयं पृच्छ गमनं युक्तं न वेति जिज्ञासस्व कुम्भौ हि पाठे अनयोरित्यर्थः पृच्छेति भावः ॥ ६ ॥

अधिगतेति । हे चण्डि ! कोपने ! अखिलसखीभिः सहचरीवर्गैः अधिगतं परिज्ञातं तव वपुः शरीरं अपि रतिरणे सुरतसंग्रामे सज्जं सन्नद्धं रणिताया रसनायाः काञ्च्याः रवः ध्वनिरेव डिण्डिमः रणवाद्यभेदः यत्र तादृशं सरसं रसपूर्णं यथा तथा अलज्जं लज्जाशून्यं [illegible] अभिसरं कृष्णमुपगच्छ ॥ ७ ॥

करेति । स्मरस्य कामस्य शरा इव सुभगाः शोभनाः नखाः यस्य

श्रीजयदेवभणितमधरीकृतहारमुदासितवामम् ।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम् 'मुग्धे !'

इति विंशतितमः प्रबन्धः ।

सा मां द्रक्ष्यति वक्ष्यति प्रियकथां प्रत्यङ्गमालिङ्गनैः
प्रीतिं यास्यति रंस्यते सखि ! समागत्येति चिन्ताकुलः ।
स त्वां पश्यति वेपते पुलकयत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः ॥ १० ॥

तादृशेन करेण स्वेन सखीं सविलासं यथा तथा सखीं अवलम्ब्य व्रज गच्छ । मधुकरनिकरैः भ्रमरनिकरैः निजगतिशीलं निजस्य आत्मनः गतिं शीलयति अनुकरोति तथोक्तं, 'त्वदागमनोत्सुकचित्तम्' हरिं अवबोधय अहमागतेति ज्ञापय अपिशब्दार्थे ॥ ८ ॥

श्रीति । अधरीकृतातिरस्कृताः हाराः येन तादृशं हारापेक्षयापि अतिकमनीयमित्यर्थः, उदासिता न्यक्कृताः वामा सुन्दरी येन तथाभूतं सुन्दरीनायिकापेक्षया अपि कमनीयमित्यर्थः श्रीजयदेवस्य भणितं भाषितं हरौ कृष्णे विनिहितम् अर्पितम् मनो येषां तादृशानां कृष्णभक्तानामित्यर्थः कण्ठतटीं कण्ठदेशम् अविरामम् अनवरतम् अधितिष्ठतु कृष्णभक्ताः सततं जयदेवगीतं कीर्त्तयन्तु इति भावः ॥ ९ ॥

सेति । हे सखि ! स्थिरं गाढं तमसां पुञ्जं यस्मिन् तादृशे निकुञ्जे स्थः तव प्रियः कृष्णः सा राधा समागत्य मां द्रक्ष्यति, प्रियकथां वक्ष्यति, प्रत्यङ्गम् आलिङ्गनैः प्रत्यङ्गैरिति भावः प्रीतिं सन्तोषं यास्यति, रंस्यते विहरिष्यति च इति चिन्ताकुलः सन् त्वां पश्यति त्वदागमं निरीक्षते इत्यर्थः, वेपते अप्रियशङ्कया कम्पते, पुलकयति तनूरुहाणाम् उद्गमात् रोमाञ्चः भवति, आनन्दति तव सुरतप्राप्त्याशयेति भावः स्विद्यति स्विन्नतया घर्माक्तो भवति, प्रत्युद्गच्छति त्वामुपस्थितां बुद्ध्वा प्रत्युद्गमनं करोति उत्तिष्ठतीत्यर्थः तथा मूर्च्छति विरहेण असुखभरावनतया मोहं गच्छति ।

अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलिं
मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ।
धूर्त्तानामभिसारसत्वरहृदां विष्वक् निकुञ्जे सखि !
ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ॥ ११ ॥

काश्मीरगौरवपुषामभिसारिकाणां
आबद्धरेखमभितो मणिमञ्जरीभिः ।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥ १२ ॥

अत्र एकेन कारकेण अनेकक्रियान्वयात् । दीपकालङ्कारः तदुक्तं दर्पणकारेण अप्रस्तुतप्रस्तुतयोः दीपकन्तु निगद्यते । अथ कारकमेकं स्यादनेकासु क्रियासु चेदिति ॥ १० ॥ शार्दूलविक्रीडितं वृत्तम् ।

सम्प्रति अभिसारयोग्यम् अन्धकारं वर्णयन्नाह अक्ष्णोरिति । हे सखि ! विष्वक् समन्तात् निकुञ्जे ध्वान्तं तिमिरं धूर्त्तानाम् अन्यजनवञ्चकानाम् अभिसारे सत्वरं त्वरायुक्तं हृदयं यासां तथाभूतानां नीलनिचोलेन नीलवसनेन चारूणां मनोहारिणीनां सुदृशां सुनयनानां नारीणाम् अक्ष्णोः नेत्रयोः अञ्जनं कज्जलं श्रवणयोः कर्णयोः तापिच्छानां तमालानां गुच्छावलिं कुसुमस्तवकपङ्क्तिं कर्णभूषणभूतामित्यर्थः, मूर्द्ध्नि शिरसि श्यामसरोजानां नीलकमलानां दाम मालां तथा कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगनाभिरचितपत्रावलीं निक्षिपत् विन्यस्यत् सत् तत्तद्रूपेण परिणमदित्यर्थः अत एव प्रत्यङ्गं सर्वाङ्गव्यापीत्यर्थः आलिङ्गति ॥ ११ ॥ शार्दूलविक्रीडितं वृत्तम् ।

काश्मीरेति । एतत् तमालदलवत् नीलतमं अतिनीलं तमिस्रं तिमिरं काश्मीरं कुङ्कुमं तद्वत् गौरं वपुः शरीरं यासां तासां अभिसारिकाणां कान्तं सङ्केतं गच्छन्तीनां कामार्थिनी तु या याति सङ्केतं साभिसारिकेति वचनात् नारीणां मणिमञ्जरीभिः अलङ्कार-

हारावलीतरलकाञ्चनकाञ्चिदाम-
केयूरकङ्कणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य
व्रीडावतीमथ सखी निजगाद राधाम् ॥ १२ ॥

अथ एकविंशतितमः प्रबन्धः ।

वराडीरागरूपकतालाभ्यां गीयते ॥

मञ्जुतरकुञ्जतलकेलिसदने ।
"प्रविश राधे ! माधवसमीपमिह ।
विलस, रतिरभसहसितवदने !" ॥ १४ ॥ ध्रु०
नवभवदशोकदलशयनसारे ।

रत्नविरचैः खचितः सर्वतः काञ्चनरेखैः खचितरेखम् अतएव नाना प्रेम इव हेम काञ्चनं तस्य निजमौपम्यतां परीक्षायामायातं मन्येति विस्तारयति निजमौपम्यमिव शोभते इति ॥ १२ ॥ वसन्ततिलकं वृत्तम् ।

वक्ष्यति वह्नि तमभ्युपगतां प्रति सखी वदति हारावलीति । अथ अनन्तरं सखी हारावल्याः, तरलानि चञ्चलानि काञ्चनानि यस्य तादृश्याः काञ्चिदाम्नः रसनायाः रत्नैः केयूरस्य अङ्गदस्य कङ्कणस्य च मणीनां राधापरिहितानामिति भावः द्युतिभिः किरणैः दीपितस्य विराजितस्य निकुञ्जनिलयस्य वनान्तकुञ्जस्य द्वारे हरिं निरीक्ष्य व्रीडा-वतीं लज्जावतीं राधां निजगाद ॥ १३ ॥ वसन्ततिलकं वृत्तम् ।

वराडीरागेण रूपकतालेन च गीयते ।

मञ्जु इति । रतिरभसेन सुरतोत्सुकत्वेन हसितं स्मितं वदनं मुखं यस्याः तत्सम्बुद्धौ, हे राधे ! इह मञ्जुतरे अति मनोहरे कुञ्जस्य तले अभ्यन्तरे यत् केलिसदनं क्रीडास्थानं तत्र माधवसमीपं प्रविश, विलस विहर च ॥ १४ ॥

इत आरभ्य माधवस्य केलिसदने रत्यर्थं राधे इत्यस्य च विशे-षणाभ्यां प्रतिश्लोकमुपनिबध्नाति कविरित्यादि । नवभवता अभिनवजाते-

'प्रविश राधे ! माधवसमीपमिह' ।
विलस कुचकलशतरलहारे ! ॥ १५ ॥
कुसुमचयरचितशुचिवासगेहे ।
'प्रविश राधे ! माधवसमीपमिह' ।
विलस कुसुमसुकुमारदेहे ! ॥ १६ ॥
मृदुचलमलयपवनसुरभिशीते ! ।
'प्रविश राधे ! माधवसमीपमिह' ।
विलस रसवलितललितगीते ! ॥ १७ ॥
विततबहुवल्लिनवपल्लवघने ।
'प्रविश राधे ! माधवसमीपमिह' ।
विलस चिरमिलितपीनजघने ! ॥ १८ ॥

नेत्यर्थः अशोकदलेन सह मदनं मयाविरचनं तदेव वासः ... तादृशे केलिसदने इत्यत्र विशेषणमिदम् । कुचकलशयोः स्तनकुम्भयोः तरलः गतिमत्त्वात् चञ्चलः हारः यस्याः तत्सम्बुद्धौ, एवमुत्तरत्र बोध्यम् ॥ १५ ॥

कुसुमेति । कुसुमचयेन पुष्पसमूहेन रचितं शुचि पवित्रं निर्मल-मित्यर्थः वासगेहं शयनस्थानं यस्या इत्यर्थः, अपि च तथोक्ते कुसुमवत् सुकुमारः कोमलः देहः यस्यास्तत्सम्बुद्धौ ॥ १६ ॥

मृदु इति । मृदुना मन्देन चलता चञ्चलेन मलयपवनेन चन्दनसंसृष्टेन इति भावः, सुरभिः सुगन्धः शीतः शीतलश्च तस्मिन् । रसेन रागेण वलितं युक्तं ललितं सुन्दरं गीतं यस्याः तत्सम्बुद्धौ ॥ १७ ॥

विततेति । विस्तृताभिः बह्वीभिः वल्लीभिः लताभिः नवैः पल्लवैश्च घने निविडे इति यावत् । चिरमिलिते चिरसम्बद्धे पीने विशाले जघने नितम्बे यस्यास्तत्सम्बुद्धौ ॥ १८ ॥

मधुमुदितमधुपकुलकलितरावे ।
'प्रविश राधे ! माधवसमीपमिह' ।
विलस मदनरभसरसभावे ! ॥ १९ ॥
मधुतरलपिकनिकरनिनदमुखरे ।
'प्रविश राधे ! माधवसमीपमिह' ।
विलस दशनरुचिरुचिरशिखरे ! ॥ २० ॥
विहितपद्मावतीसुखसमाजे ।
कुरु मुरारे ! मङ्गलशतानि ।
भणति जयदेवकविराजराजे ॥ २१ ॥

इति एकविंशतितमः प्रबन्धः ।

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः

मध्विति । मधुना मकरन्देन मुदितैः प्रमत्तैः मधुपानां भ्रमराणां कुलैः वृन्दैः कलितः कृतः रावः गुञ्जनं यस्मिन् तथोक्ते । मदनरभसेन कामवेगेन रसः सरसः रसवान् भावः, मनोवृत्तिः यस्याः तत्सम्बुद्धौ, कामोत्सुकमनस्के इत्यर्थः ॥ १९ ॥

मध्विति । मधुना वसन्तेन तरलानां चञ्चलानां पिकनिकराणां कोकिलवृन्दानां निनदैः मुखरे शब्दिते । दशनरुचिरुचिरे हसति इत्यर्थः, तथा रुचिरं सुन्दरं शिखरं दन्ताग्रभागः यस्याः तत्सम्बुद्धौ, सुन्दरदन्ताकृते इत्यर्थः ॥ २० ॥

विहितेति । हे मुरारे ! विहितः कृतः पद्मावत्याः सुखसमाजः सुखसम्मर्दो येन तादृशे पद्मावतीसुखकरे इत्यर्थः भणति तव चरितं गायति इत्यर्थः जयदेवकविराजे मङ्गलशतानि बहूनि मङ्गलान्यैश्वर्याणि कुरु ॥ २१ ॥

तापितेति । हे राधे ! चित्तेन मनसा त्वां चिरं वहन् [illegible]

कन्दर्पेण च पातुमिच्छति सुधासंबाधबिम्बाधरम् ।
अस्याङ्कं तदलं कुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-
क्रीते दासइवोपसेवितपदाम्भोजे कुतः सम्भ्रमः ॥ २२ ॥

सा ससाध्वससानन्दं गोविन्दे लोललोचना ।
सिञ्जाना मञ्जु मञ्जीरं प्रविवेश निवेशनम् ॥ २३ ॥

अथ द्वाविंशतितमः प्रबन्धः ।

वराडीरागरूपकतालाभ्यां गीयते ॥

राधावदनविलोकनविकसितविविधविकारविभङ्गं
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम् ।
''हरिमेकरसं चिरमभिलषितविलासं
सा ददर्श गुरुहर्षवशंवदवदनमनङ्गनिवासम् ॥ २४ ॥

अतिशान्तः कन्दर्पेण च भग्नम् अत्यर्थं तापितश्च अयं कृष्णः तव सुधया अमृतेन सम्बाधं पूर्णं बिम्बाधरं पातुमिच्छति, तत् तस्य अङ्कं उत्सङ्गं क्षणं अलङ्कुरु भ्रूक्षेपलक्ष्म्या भ्रूभङ्ग्या लवक्रीते अतएव उपसेवितं पादाम्भोजं येन तादृशे तव पादपद्मसेविनीत्यर्थः दासे इव इह अस्मिन् कृष्णे सम्भ्रमः भयं कुतः नैव सम्भ्रमः कार्य्य इत्यर्थः ॥ २२ ॥ शार्दूलविक्रीडितं वृत्तम् ।

सेति । सा राधा ससाध्वसं ससम्भ्रमं सानन्दञ्च यथा तथा गोविन्दे कृष्णे लोले सतृष्णे लोचने यस्याः तथाभूता लोलचञ्चल-लोचनेत्यर्थः, तथा मञ्जुः मनोहरः मञ्जीरः नूपुरः यत्र तत् यथा तथा सिञ्जाना गमनवशात् नूपुररवं कुर्वाणा इत्यर्थः सती निवेशनं लतामण्डपं प्रविवेश ॥ २३ ॥ अनुष्टुप् ।

वराडीरागेण रूपकतालेन च गीयते ।

राधेति । सा निवेशनं प्रविशन्ती राधा राधायाः वदनस्य मुखस्य विलोकनेन दर्शनेन विकासितः प्रकटितः विविधः विकाराणां काम-

हारममलतरतारमुरसि दधतं परिलम्ब्य विदूरम् ।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम् ।
'हरिमेकरसम्' ॥ २५ ॥

श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम् ।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलम् ।
'हरिमेकरसम्' ॥ २६ ॥

तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम् ।

ध्वनितानां विभङ्गः विभेदः यस्य तम् । विधुमण्डलस्य चन्द्रमण्डलस्य दर्शनेन तरङ्गिताः चञ्चलिताः तुङ्गा महान्तः तरङ्गा यस्य तादृशं जलनिधिं समुद्रमिव एकरसं चिरानुरक्तं चिरं बहुकालम् अभिलषितः आकाङ्क्षितः विलासः यस्य तं पुरोभिरतः स्थितं वशंवदं वश्यं यस्य तथाभूतं हर्षविकासविकसितविस्तारं तथा अनङ्गस्य कामस्य निवासं आश्चर्यं हरिं ददर्श ॥ २४ ॥

अतः परमाश्चर्यं हरिविग्रहस्य विशेषणानि वर्णयति हार-मित्यादि । परिलम्ब्य लम्बमानं दूरं इत्यस्य अमलतरा अति-अमला तारा मध्यमणिर्यस्य तादृशं उरसि दधतं धारयन्तं अतएव स्फुटतरेण फेनकदम्बेन फेनराशिना करम्बितं युक्तं यमुनाजलस्य कालिन्दीसलिलस्य पूरं प्रवाहमिव स्थितम् । यमुनायाः श्यामवर्ण-त्वात् फेनस्य च शुक्लत्वात् औपम्यं बोद्धव्यम् ॥ २५ ॥

श्यामलेति । अधिगतं परिहितं गौरं दुकूलं येन तं तथा श्यामलं मृदुलं कोमलं कलेवरं शरीरं मण्डलमिव मण्डलं यस्य इति तावत् मनोज्ञम् अतएव पीतेन परागाणाम् कुसुमरजसां पटल-भरेण पुञ्जातिशयेन वलयितं वेष्टितं मूलं यस्य तथाभूतं नील-नलिनं नीलोत्पलमिव स्थितम् ॥ २६ ॥

तरलेति । तरलेन चञ्चलेन दृगञ्चलचलनेन कटाक्षक्षेपेण मनो-

स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तड़ागम् ।

'हरिमेकरसम्' ॥ २७ ॥

वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम् ।

स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम् ।

'हरिमेकरसम्' ॥ २८ ॥

शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशम् ।

तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम् ।

'हरिमेकरसम्' ॥ २९ ॥

विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम् ।

हरं यत् यद्वं तस्मात् जनितः रतिरागः सुरतौत्सुक्यं यस्य तादृशम् अतएव शरदि शरत्काले स्फुटस्य विकसितस्य कमलस्य उदरे अभ्यन्तरे खेलितं क्रीडापरं खञ्जनयुगं यस्य तथाभूतं तड़ागं सरोवरमिव स्थितम् ॥ २७ ॥

वदनेति । वदनमेव कमलं पद्मं तस्य परिशीलनाय विकाशाय मिलितस्य समागतस्य मिहिरस्य सूर्यस्य समा सदृशी कुण्डलस्य कर्णभूषणस्य शोभा यस्य तथोक्तं सूर्यवदुज्ज्वलकुण्डलविभूषितः, तथा स्मितस्य मृदुहसितस्य रुच्या शोभया रुचिरेण सुन्दरेण अतएव समुल्लसितेन सुशोभितेन अधरपल्लवेन कृतः जनितः रतये सुरताय लोभः येन तादृशम् ॥ २८ ॥

शशीति । शशिनः चन्द्रस्य किरणैः छुरितं व्याप्तं उदरं यस्य तादृशः यः जलधरः तद्वत् सुन्दरः सकुसुमः कुसुमखचितः केशः यस्य तथोक्तम् । तथा तिमिरेषु अन्धकारेषु उदितं यत् विधुमण्डलं चन्द्रमण्डलं तद्वत् निर्मलेन मलयजेन चन्दनेन तिलकनिवेशः यस्य तथाभूतम् ॥ २९ ॥

विपुलेति । विपुलः अत्यधिकः पुलकभरः रोमाञ्चातिशयः तेन

मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम् ।

'हरिमेकरसम्' ॥ २० ॥

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् ।

प्रणमत हृदि विनिधाय हरिं भवजलसुकृतोदयसारम् ।

'हरिमेकरसम्' ॥ २१ ॥

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-

प्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः ।

इदानीं राधायाः प्रियतमसमालोकसमये

पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः ॥ २२ ॥

दन्तुरितं व्याप्तं तथा रतिकेलिविषयाभिः सुरतक्रीडाकुशलैः नखैः ध्वनी चपलम् । तथा मणिमयानां रत्नमयूखानाम् समुज्ज्वलानामिति भावः किरणसमूहैः समुज्ज्वलैः भूषणैः सुभगं सुन्दरं शरीरं यस्य तथाभूतम् ॥ २० ॥

श्रीति श्रीजयदेवस्य भणित विभावेन कवित्वगुणेन द्विगुणीकृतः वर्द्धित इत्यर्थः भूषणस्य अलङ्कारस्य भारः यस्य तं तथा भव संसार एव जलं तस्मिन् यत् सुकृतं पुण्यं तस्य उदयः उद्भवः तस्य सारं फलभूतमित्यर्थः हरिं हृदि विनिधाय ध्यायित्वा प्रणमत । भक्तान् प्रति कविरुक्तिरियम् ॥ २१ ॥

अतिक्रम्येति । इदानीं प्रियतमस्य कृष्णस्य समालोकसमये समुत्कण्ठाके अपाङ्गं नेत्रप्रान्तम् अतिक्रम्य श्रवणपथपर्यन्तं दूरदूरगमनैः गमनप्रयासेन अतिपरिश्रमेणेव तरलतरा अतिचपला तारा कनीनिका यत्र तत् यथा तथा पतितयोः राधायाः अक्ष्णोः नेत्रयोः स्वेदाम्बुप्रसरः परिश्रमजनित घर्मजलसमूह इव हर्षाश्रुनिकरः आनन्दबाष्पवृन्दः पपात ॥ २२ ॥ [illegible] ।

भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-
स्मितं याते गेहाद्बहिरवहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशरवशाकूतसुभगं
सलज्जाया लज्जापि व्यगमदिव दूरं मृगदृशः ॥ २३ ॥

जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
भुजापीडक्रीडाहतकुवलयापीडकरिणः
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥ २४ ॥

इति श्रीगीतगोविन्दे राधिकामिलने सानन्ददामोदरो नाम एकादशः सर्गः ॥ ११ ॥

भजन्त्या इति । तल्पान्तं शय्याप्रान्तं भजन्त्या गच्छन्त्या शय्योपरि उपविशन्त्या इत्यर्थः कृता या कपटकण्डूतिः छलकण्डूयनं तया पिहितम् आच्छादितं स्मितं येन, तादृशे अवहिते सतर्के आलीपरिजने सखीजने गेहात् निकुञ्जभवनात् बहिर्याते च स्मरशरवशेन कामशरप्रहारेण यः आकूतः अभिलाषः तेन सुभगं सुन्दरं यथा तथा प्रियस्य कृष्णस्य आस्यं मुखं पश्यन्त्याः अतएव सलज्जायाः मृगदृशः मृगाक्ष्याः राधायाः लज्जा दूरं अपगमदिव । सखीसमक्षं सलज्जा आसीत् इदानीं तद्विगमनात् लज्जां त्यक्त्वा अभिलाषोचितं विजहार इति भावः ॥ २३ ॥ शिखरिणीवृत्तम् ।

जयश्रीति । जयश्रिया विजयलक्ष्म्या विन्यस्तैः अर्पितैः मन्दारकुसुमैः सुरतरुकुसुमैः महितः पूजित इव द्विपेन हस्तिना सह यः रणः संग्रामः तेन मुदा हर्षेण स्वयं सिन्दूरेण मुद्रित इव रञ्जित इव भुजापीडे बाहुदण्डेन क्रीडया हतस्य कुवलयापीडाख्यस्य कंस-करिणः प्रकीर्णः समन्तात् प्रक्षिप्तः असृग्बिन्दुः शोणितबिन्दुर्येन जयति सर्वोत्कर्षेण वर्तते ॥२४॥
तादृशः मुरजितः कृष्णस्य भुजदण्डः

अथ द्वादशः सर्गः ।

सुप्रीतपीताम्बरः ।

गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर-

स्मरशरवशाकूतस्फीतस्मितस्नपिताधराम् ।

सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव-

प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम् ॥ १ ॥

अथ त्रयोविंशः प्रबन्धः ।

विभासरागैकतालीतालाभ्यां गीयते ।

गतवतीति । सखीवृन्दे सहचरीसमूहे गतवति सति हरिः अमन्दः निबिडः त्रपाभरः लज्जातिशयः तस्मात् तादृशेन निर्भरेण अति-प्रवृद्धेन स्मरशरवशेन यः आकूतः अभिप्रायः तेन स्फीतं प्रवृद्धं यत् स्मितं ईषद्धसितं तेन स्नपितः अभिषिक्तः अधरः यस्याः तादृशीं सर-समनसं अनुरागार्द्रचित्तां तथा नवपल्लवानां प्रसवः कुसुमं एव शयनं तस्मिन् निक्षिप्तम् अक्षि यया तां प्रियां राधां दृष्ट्वा मुहुः पुनः पुनः उवाच ॥ १ ॥ हरिश्चोक्तम् ।

विभासरागेण एकतालीतालेन च गीयते । विभासरागलक्षणं यथा ।

पञ्चास्त्रसन्ताननिजयुग्मचापः प्रियाधरं स्वादुसमानिलग्नः पञ्चस्वरस्थापित-कलोपवेशो भावो विपूर्वः शिव एव गौरः इति । सङ्गीतपारिजातोक्त-लक्षणं यथा । यस्तु तीव्रतरो यत्र न गो नीवौ रि-धौ मतौ । कोमलौ ध्यानयोपेतः विभासो गादिमूर्छने । आरोहे न नि-गयोः स्यात् न-धांशकरयंशे ॥

स ध ध ध रिं ग मा ग मा रि ध ध नि ध प ध ध ध नि

ध नि ध प म प म मा रि ध ध रिं ध [illegible] ध ध ध नि ध

किसलयशयनतले कुरु कामिनि! चरणनलिनविनिवेशम् ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ।
'क्षणमधुना नारायणमनुगतमनुसर भो राधिके'! । ध्रु० ॥२॥
करकमलेन करोमि चरणमहमागमितासि विदूरम् ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं 'क्षण०' ध्रु० ३
वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं 'क्षण०' ध्रु० ४

प ध स स नि ध नि ध प ग प म गा रि स स रि स रि
स स स नि ध प धा प मा पा पा ध मा स नि ध प धा प
प मा ग गा रि स । स रि स स नि ध प ध ध सा रि
रि सा म मा गा रि सा ॥

इति विभासः । प्रातःकालीयः ।

किसलयेति । हे कामिनि ! किसलयशयनतले नवपल्लवशय्यायां चरणनलिनविनिवेशं पादपद्मार्पणं कुरु, इदं किसलयशयनं सुवेशं सुविरचितं तव पदपल्लवस्य वैरि शत्रुभूतम् अतः पराभवं पराजयं तव पदपल्लवेनास्य शिरसि अवस्थानादिति भावः अनुभवतु प्राप्नोतु, भो राधिके ! अधुना अनुगतं नारायणं मामित्यर्थः क्षणं अनुसर अनुगच्छ ममाभिलाषं पूरयेत्यर्थः ॥ २ ॥

करकमलेनेति । हे प्रिये ! विदूरं बहुदूरम् आगमिता आनीता असि मयेति शेषः तस्मात् करकमलेन निजेनेति शेषः तव चरणं करोमि संवाहयामि दूरागतस्य पादसंवाहनस्यौचित्यादिति भावः, मामिव अनुगतिशूरम् अत्यन्तानुगतमित्यर्थः नूपुरं शयनोपरि क्षणम् उपकुरु स्थापय । अत्यन्तानुगते उपकारः कर्त्तव्य इति भावः ॥ ३ ॥

वदनेति । वदनमेव सुधानिधिः चन्द्रः तस्मात् गलितम् अमृत-
[illegible] रचय वद । अहञ्च पयोधररोधकं

प्रियपरिरम्भणरभसवलितमिव पुलकितमत्यदुरवापम् ।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापं 'क्षण०' 'भु०'

अधरसुधारसमुपनय भामिनि ! जीवय मृतमिव दासम् ।
त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम् ।
'क्षणमधुना' ॥ ६ ॥

शशिमुखि ! मुखरय मणिरसनागुणमनुगुणकण्ठनिनादम् ।
मम श्रुतियुगले पिकरवविकले शमय चिरादवसादम् ।
'क्षणमधुना' ॥ ७ ॥

स्तनावरणं स्तनाच्छादकं मा उरसि वक्षसि स्थितं दुकूलं वसनं विरहमिव अपनयामि ॥ ४ ॥

प्रियेति । हे प्रिये ! मम उरसि वक्षसि प्रियस्य कान्तस्य ममेति भावः, परिरम्भणरभसेन आश्लेषावेगेन वलितम् आकृष्टमिव पुलकितं रोमाञ्चितम् अन्येन मदव्यतिरिक्तेन जनेन दुरापं दुर्लभं कुचकलशं स्तनकुम्भं निवेशय अर्पय, तेन च मम मनसिजतापं कामसन्तापं शोषय निर्वापय ॥ ५ ॥

अधरेति । हे भामिनि ! सुन्दरि ! अधरसुधारसम् अधरामृतम् उपनय देहि त्वयि विनिहितमनसम् अर्पितचित्तं विरहानलेन दग्धवपुषं अतएव अविलासं विलासरहितं निरानन्दमित्यर्थः, मृतमिव दासं किङ्करं मामिति शेषः जीवय ॥ ६ ॥

शशीति । हे शशिमुखि ! चन्द्रवदने ! अनुगुणः अनुरूपः कण्ठस्य निनादः ध्वनिर्यस्य तादृशं तव कण्ठस्वनतुल्यं मणिरशनागुणं रत्ननिर्मितकाञ्चीदाम मुखरय निधुवनलीलया चञ्चलचालनेन शब्दितं कुरु, पिकानां कोकिलानां रवेण विकले रुद्धे विरहोद्दीपकत्वादिति भावः । मम श्रुतियुगले कर्णद्वये चिरात् अवसादं विषादं शमय नाशय ॥ ७ ॥

मामतिविफलरुषा विकलीकृतमवलोकितुमधुनेदम्।
मीलति लज्जितमिव नयनं तव विरम विसृज रतिखेदम्॥
'क्षणमधुना' ॥ ८ ॥

श्रीजयदेवकवेरिदमनुपदनिगदितमधुरिपुमोदम्।
जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम्।
'क्षणमधुना' ॥ ९ ॥

इति श्रीगीतगोविन्दे त्रयोविंशः प्रबन्धः।

प्रत्यूहः पुलकाङ्कुरेण निविडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधरसुधापाने कथाकेलिभिः।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूत्
उद्भूतः स तयोर्बभूव सुरतारम्भः प्रियम्भावुकः॥ १० ॥

मामिति। हे राधे! अधुना तव इदं नयनम् अतिविफलरुषा अतिविफलेन विरहजनितेन मानापरनाम्ना कोपेन विफलीकृतं वञ्चितमित्यर्थः, विकलीकृतमिति पाठे विकलीकृतं क्लेशितं मां अवलोकितुं दृष्टुं लज्जितं सलज्जमिव मीलति तस्मात् विरम निवर्त्तस्व कोपादिति शेषः रतिखेदं सुरतदैन्यं विसृज त्यज अभिलाषानुरूपसुरतेन मां तोषय इति भावः॥ ८॥

श्रीति। श्रीजयदेवकवेः अनुपदनिगदितं पदे पदे भणितं मधुरिपोः कृष्णस्य मोदः सन्तोषः यत्र तथाभूतम् इदं गीतमिति शेषः, रसिकजनेषु मनोरमरतिरसविनोदं मनोहरसुरतरङ्गं जनयतु॥९॥

अथ सुरतारम्भं कीर्त्तयति प्रत्यूह इति। तयोः राधाकृष्णयोः यः प्रियम्भावुकः अतिप्रियः सुरतारम्भः उद्भूतः आत्मप्रकटतया अनुभूतः बभूव। यस्मिन् सुरतारम्भे पुलकाङ्कुरेण रोमोद्गमेन निविडाश्लेषे गाढालिङ्गने, निमेषेण क्रीडायाम् आकूतविलोकिते साभिप्रायावलोकने, कथाकेलिभिः वाक्चातुर्यैः अधरसुधापाने, [illegible]

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजै-
राविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः।
हस्तेनानमितः कचेऽधरमधुस्यन्देन सम्मोहितः
कान्तः कामपि तृप्तिमाप तदहो! कामस्य वामा गतिः ॥११॥

माराङ्के रतिकेलिसङ्कुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात्।
निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति ॥ १२ ॥

मन्मथकलायुद्धे कामक्रीडाविशेषरूपसंग्रामेऽपि आनन्दाधिक्येन स्वसौख्यानुभवेन प्रत्यूहः विघ्नः अभूत् ॥ १० ॥ शार्दूलविक्रीडितं वृत्तम्।

विपरीतसुरतं वर्णयति—दोर्भ्यामिति। कान्तः प्रियः तस्याः दोर्भ्यां भुजाभ्यां संयमितः नियन्त्रितः, पयोधरयोः भरेण आपीडितः आहतः, पाणिजैः नखैः आविद्धः विद्धः, दशनैः दन्तैः क्षतम् अधरपुटं यस्य तादृशः श्रोणितटेन नितम्बदेशेन आहतः, हस्तेन कचे केशे आनमितः, अधरमधुस्यन्देन अधरमधुदानेन सम्मोहितः सम्यक् तोषितः सन् कामपि अनिर्वचनीयां तृप्तिं सन्तोषम् आप प्रापत् अहो! आश्चर्यं तत् तस्मात् कामस्य गतिः वामा विपरीता, कामस्य स्वरूपा विपरीत गतिः चमत्कारिण्येव ॥ ११ ॥ शार्दूलविक्रीडितं वृत्तम्।

पुनश्च तदेवाह—माराङ्के इति। तया राधया कान्तस्य कृष्णस्य जयाय पराभवाय माराङ्के माराङ्काभिधाने रतिकेलिसङ्कुलरणारम्भे सुरतक्रीडारूपसंग्रामारम्भे साहसप्रायम् अतिशयदुष्करं यत्सम्भ्रमात् आवेगात् उपरि कान्तस्योपरि भावः। यत् किञ्चित् अवर्णनीयं प्रारम्भि तत्क्षणं सैव वैपरीत्येन जघनस्थली निष्पन्दा, दोर्वल्लिः भुजलता शिथिलिता, वक्षः उत्कम्पितं तथा अक्षि नयनं मीलितं सङ्कुचितम्।

तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धूताऽधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः ।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशोः
एभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितम् ॥ १३ ॥
त्वामप्राप्यमपि स्वयंवरपरां क्षीरोदतीरोदरे
शङ्के सुन्दरि ! कालकूटमपिबन्मूढो मृडानीपतिः ।
इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वामाञ्चलम् ।
राधायाः स्तनकोरकोपरि लसन्नेत्रो हरिः पातु वः ॥१४॥

सुतनौ तदित्याह कोपाम् अवलानां यौवनरूपः पुरुषव्यवहारं कुतः शिक्षयति ? नैव शिक्षयतीत्यर्थः ॥१२॥ शार्दूलविक्रीडितं वृत्तम् ।

तस्या इति । तस्याः राधायाः उरः पाटलैः श्वेतरक्तैः पाणिजैः नखैः अङ्कितं दृशौ नयने, निद्रया, निद्रावेशेन कषाये रञ्जिते, अधरस्य शोणिमा लौहित्यं निर्धूता निरस्ता नितरां पानादिति भावः मूर्धजाः केशाः विलुलिताः स्रस्ताश्च अंशिताश्च स्रजः मालाः येभ्य स्तादृशाः, काञ्चीदाम दरश्लथम् ईषत् शिथिलम् अञ्चलं यस्य तथाभूतम् । इति इत्थं प्रातः प्रभाते दृशोर्नयनयोः निखातैः एभिः पूर्वोक्तैः कामशरैः नखक्षतशोणत्वचुम्बनकेशाकर्षण नीवीस्खलनरूपैः पत्युः कान्तस्य मनः कीलितं विद्धम् अहो ! तत् अद्भुतम् या अन्यैः कामशरा अन्यः निहिताः परम् अन्यत् कीलितमिति चमत्कार इत्यर्थः प्रातःकालदर्शी राधां विलोक्य कृष्णस्य पुनः सुरताभिलाषो जात इति भावः ॥ १३ ॥ शार्दूलविक्रीडितं वृत्तम् ।

वक्ष्यति आशिषा ग्रन्थं समापयति त्वामिति । हे सुन्दरि ! क्षीरोदस्य क्षीरसमुद्रस्य तीरोदरे तटमध्ये मयि स्वयम्वरपरां महेशविलासिकार्यैः त्वां अप्राप्य मूढः मम सौन्दर्य्येण विमुग्धः मृडानीपतिः पार्वतीनाथः कालकूटं विषं अपिबत् इव अहं जीवनमिति जीवनपरित्यागा-

व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ
स्पष्टा दष्टाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः ।
काञ्ची काञ्चिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः
पश्यन्ती चात्मरूपं तदपि विलुलितस्रग्धरेयं धिनोति ॥१५॥
ईषन्मीलितदृष्टि मुग्धहसितं सीत्कारधारावशाद्
अव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम् ।

वेति भावः एतेन पार्वत्या अपि राधायाः सौन्दर्यमधिकमिति व्यज्यते । इत्यहं यद्वै मन्ये इत्यम् एवम्भूताभिः पूर्वकथाभिः पुराहमकथनैः अन्यमनसः आश्चिप्तचित्तायाः राधायाः वामाङ्कं हृदयवामभागं व्यस्तं वसनं विश्लिष्य अपनीय स्तनकोरकयोः कुचकुड्मलयोः उपरि भ्रमन्ती विकसन्ती नेत्रे यस्य तथाभूतः हरिः वः युष्मान् भक्तानिति भावः पातु रक्षतु ॥ १४ ॥ शार्दूलविक्रीडितं वृत्तम् ।

व्यालोल इति । यदि चेति अध्याहार्यं यदि च केशपाशः व्यालोलः इतस्ततो विक्षिप्तः, अलकैः चूर्णकुन्तलैः तरलितं चञ्चलत्वम् आश्रितं कपोलौ गण्डदेशौ स्वेदेन घर्मजलेन लोलौ व्याप्तौ, दष्टा दशनक्षता अधरश्रीः अधरशोभा स्पष्टा, हारयष्टिः मुक्ताहारः कुचकलशरुचा स्तनकलशोपरि स्थिति अनितया कान्त्या हारिता परिभूता ... त्यादिति भावः, काञ्ची मेखला काञ्चित् आशां दिशं गता, तदपि एवं सति इयं राधा सद्यः तत्क्षणात् पाणिना हस्तेन स्तनजघनपदम् आच्छाद्य विलुलितां विच्छिन्नां स्रजं मालां धारयतीति तथोक्ता आत्मनः रूपं पूर्वोक्तप्रकारं पश्यन्ती सती धिनोति कान्तं प्रीणयतीत्यर्थः । स्रग्धरा-नामकं वृत्तमिदम् ॥ १५ ॥

ईषदिति । अन्यः सौभाग्यवान् जनः याचेन कामार्त्तमर्दितेन उद्गतस्वेदयोः पयोधरयोः स्तनयोः उपरि परिष्वङ्गात् ... यः कुर्वीत्कर्षः आतन्द्रातिशयः तेन विह्वला अलसा निःसहा अवशा

श्वासोत्कम्पिपयोधरोपरि परिष्वङ्गात् कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननम् ॥ १६ ॥

अथ सा निर्गता बाधा राधा स्वाधीनभर्तृका ।
निजगाद रतिक्लान्तं कान्तं मण्डनवाञ्छया ॥ १७ ॥

इति च सहसा प्रीतं सुरतान्ते मानितातिखिन्नाङ्गी
राधा जगाद सादरमिदमानन्देन गोविन्दम् ॥ १८ ॥

अथ चतुर्विंशः प्रबन्धः ।

रामकरीरागयतितालाभ्यां गीयते ।

कुरु यदुनन्दन ! चन्दनशिशिरतरेण करेण पयोधरे
मृगमदपत्रकमत्र मनोभवमङ्गलकलससहोदरे ।

तनुर्यस्यास्तादृश्याः कुरङ्गीदृशः हरिणाक्ष्याः कान्तायाः ईषत् मीलिता चक्षुर्यता दृष्टिर्यस्य तत् सुतरां सुन्दरं हसितं यस्य तथाभूतं सीत्कारवशात् अव्यक्तेन अस्फुटेन आकुलेन असम्बद्धेन केलिकाकुल क्रीड़ाजनितध्वनिविकारेण विलसद्भिः दन्तांशुभिः धौतः क्षालित अधरः यस्य तादृशम् आननं धयति पिबति ॥ १६ ॥ शार्दूलविक्रीड़ितं वृत्तम् ।

अथेति । अथ अनन्तरं निर्गता निरस्ता बाधा कामपीड़ा यस्याः तादृशी स्वाधीनभर्तृका स्वाधीनः स्ववशः भर्त्ता यस्याः तथाभूता राधा मण्डनवाञ्छया अलङ्करणाभिलाषेण रतिक्लान्तमपि कान्तं निजगाद । स्वाधीनभर्तृकालक्षणं यथा सदा वराहृतैव पार्श्वं चरणपातिते । सम्मुखेनेव कान्तेन क्रीड़ेत् स्वाधीनभर्तृकेति ॥ १७ ॥ अनुष्टुप् छन्दः ।

इति चेति । सुरतान्ते सम्भोगावसाने अतिखिन्नम् अङ्गं यस्याः तादृशी मानिता सम्मानं प्रापिता राधा सहसा प्रीतं गोविन्दं आनन्देन सादरं आदरेण चेतसः इति वक्ष्यमाणरूपम् इदं वचनं जगाद बभाषे ॥ १८ ॥ आर्यावृत्तम् ।

कुरु इति । हृदयानन्दने यदुनन्दने क्रीड़ति सति सा राधा

निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने ॥ १९ ॥

अलिकुलगञ्जनसञ्जनकं रतिनायकसायकमोचने
त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय ! लोचने ।
'निजगाद सा' ॥ २० ॥

नयनकुरङ्गतरङ्गविलासनिरोधकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे शुभवेश ! निवेशय कुण्डले ॥
'निजगाद सा' ॥ २१ ॥

भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम सम्मुखे ।
जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ।
'निजगाद सा' ॥ २२ ॥

निजगादेति । हे यदुनन्दन ! चन्दनादपि शिशिरतरेण अतिशीतलेन करेण त्वमिति शेषः अत्र मदीभवस्य कामस्य मङ्गलकलशसहोदरे मङ्गलकुम्भसदृशे पयोधरे स्तने मृगमदपत्रं कस्तूरिकापत्रावलिं कुरु विरचय ॥ १९ ॥

अलीति । हे प्रिय ! रतिनायकस्य कामस्य सायकं शरं कटाक्षरूपमिति भावः मुञ्चति क्षिपतीति तथोक्ते लोचने नयने ममेति शेषः अलिकुलगञ्जनसञ्जनकं भ्रमरसमूहतिरस्कारकं तव अधराभ्यां चुम्बनेन लम्बितं गलितं कज्जलम् उज्ज्वलय पूर्ववद् विधेहीत्यर्थः ॥ २० ॥

नयनेति । हे शुभवेश ! नयनमेव कुरङ्गः मृगविशेषः तस्य यः तरङ्गः विलासः उल्लम्फनं गमनं अतिविस्तार इति भावः तस्य निरोधकरे प्रतिरोधके मनसिजस्य कामस्य यः पाशः बन्धनरज्जुः तस्य विलासं आदर्शं धरतीति तथोक्ते श्रुतिमूले कर्णमूले कुण्डले श्रुत-च्छिद्रे इति भावः निवेशय अर्पय ॥ २१ ॥

भ्रमरेति । हे नाथ ! मम सम्मुखे कमलं जितं कमलं येन

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे।
विहितकलङ्ककलं कमलानन! विश्रमितश्रमशीकरे॥
'निजगाद सा' ॥ २३ ॥

मम रुचिरे चिकुरे कुरु मानद! मानसिजध्वजचामरे।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे॥
'निजगाद सा' ॥ २४ ॥

सरसघने जघने मम शम्बरदारणवारणकन्दरे।
मणिरसनावसनाभरणानि शुभाशय! वासय सुन्दरे
'निजगाद सा' ॥ २५ ॥

तस्मिन् विमले .[illegible] मुखे उपरि सुखस्थेति भावः रुचिरं चक्रकारं भ्रमरचयं भ्रमरसमूहं रचयन्तं भ्रमरसमूहबुद्धिं जनयन्तं यतो भ्रमरास्तत्र रौचिष्यादिति भावः नर्मजनकं कौतुककरं हरिरत्र भाति भावः अलकं कुन्तलं रुचिरं यथा तथा परिकर्मय प्रसाधय विरचय इत्यर्थः ॥ २२ ॥

मृगमदेति। हे कमलानन! पद्मास्य! विश्रमितः विश्रामं प्राप्तः श्रमशीकरः श्रमाम्बुकणः यत्र तादृशे शोभितघर्मजले अलिकरजनी-करे ललाटचन्द्रे मृगमदरसेन कस्तूरिकाद्रवेण वलितं निर्मितम् अत-एव विहिता कलङ्कस्य कला चाम्यं येन तादृशं ललितं सुन्दरं तिलकं कुरु रचय ॥ २२ ॥

ममेति। हे मानद! सम्मानप्रद! मनसिजस्य कामस्य ध्वजचामरे ध्वजस्थचामरसदृशे रतिगलिते सुरतश्लथे शिखण्डिनः मयूरस्य शिखण्ड-कडामरे बर्हसदृशे ललिते सुन्दरे रुचिरे रुचिप्रदे [illegible] इत्यर्थः मम चिकुरे कुन्तले कुसुमानि कुरु रचय ॥ २४ ॥

सरसेति। हे शुभाशय! सदाशय! सरसे कामोद्दीपने घने निबिडे शम्बरदारणः काम एव वारणः हस्ती तस्य कन्दरे गुहायां

श्रीजयदेववचसि शुभदे हृदयं सदयं कुरु मण्डने ।
हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखण्डने
"निजगाद सा" ॥ २६ ॥

इति चतुर्विंशः प्रबन्धः ।

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयो
र्घटय जघने काञ्चीमञ्च स्रजा कबरीभरम् ।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरौ
इति निगदितः प्रीतः पीताम्बरोऽपि तथाकरोत् ॥ २७ ॥

पर्य्यङ्कीकृतनागनायकफणाश्रेणीमणीनाङ्गणे
संक्रान्तप्रतिबिम्बसंकलनया बिभ्रद्वपुर्विक्रियाम ।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः
कायव्यूहमिवाचरन्नुपचिताकूतो हरिः पातु वः ॥ २८ ॥

कामावासे इत्यर्थः सुन्दरे मम जघने मणिरसनां रत्नखचितकाञ्चीं वसनम् आभरणानि च वासय यथास्थानं स्थापय ॥ २५ ॥

श्रीति । शुभदे श्रेयःसाधने हरिचरणयोः स्मरणमेव अमृतं तेन निर्मितम् उत्पादितं कलिकलुषज्वरस्य कलिजनितपापसन्तापस्य खण्डनं येन तस्मिन्, मण्डने अलङ्काररूपे श्रीजयदेववचसि हृदयं सदयम् अनुरक्तं कुरु । पाठकं प्रति उक्तिरियम् ॥ २६ ॥

रचयेति । कुचयोः स्तनयोः पत्रं चित्रविशेषं रचय, कपोलयोः गण्डयोः चित्रं कुरुष्व, जघने काञ्चीं घटय, स्रजा मालया कबरीभरं केशपाशं च बधान, पाणौ वलयश्रेणीं कलय अर्पय, पदे चरणे नूपुरौ कुरु हे कृष्ण इति राधया निगदितः पीताम्बरः अपि प्रीतः सन् तथा कृतवान् राधोक्तं सर्वं अकरोत् ॥ २७ ॥ हरिणीवृत्तम् ।

आशिषा सर्गमुपसंहरति । पर्यङ्कीकृतस्य नागनायकस्य [illegible]
फणाश्रेणीनां ये मणयः रत्नानि तेषां गणे समूहे [illegible] प्रति-

यद्गान्धर्वकलासु कौशलमनुध्यानञ्च यद्वैष्णवम्
यच्छृङ्गारविवेकतत्त्वमरचना काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥ २९ ॥
श्रीभोजदेवप्रभवस्य राधादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥ ३० ॥

बिम्बस्य प्रतिकृतेः छलनया संक्रमणेन वपुषः विक्रियां शरीरपरम्परां बिभ्रत् धारयन् उपचितः वृद्धिं गतः आकूतः सुरताभिलाषः यस्य तादृशः 'रिरंसुरित्यर्थः' पादाम्भोरुहधारिणी चरणकमलसेविनी या वारिधिसुता लक्ष्मीः ताम् अक्ष्णां शतैः नेत्रशतैः दिदृक्षुः द्रष्टुमिच्छुः अतएव कायव्यूहं शरीरसमूहमिव आचरन् हरिः वः युष्मान् पातु रक्षतु ॥ २८ ॥ शार्दूलविक्रीडितं वृत्तम् ।

यदिति । जयदेवकवेः गान्धर्वकलासु सङ्गीतविद्यासु यत् कौशलं नैपुण्यं यच्च वैष्णवं विष्णुविषयम् अनुध्यानं चिन्तनं यदपि शृङ्गारस्य रसस्य विवेकः सम्भोगविप्रलम्भादिविषयः तस्य तत्त्वं याथार्थ्यं तस्य रचना, यत् काव्येषु लीलायितं विलसितम् अस्तीति शेषः कृष्णे एकतानः एकाग्रः आत्मा चित्तं यस्य तादृशस्य कृष्णार्पितमनसः जयदेवपण्डितकवेः श्रीगीतगोविन्दतः तत् सर्वं सानन्दाः सुधियः विद्वांसः परिशोधयन्तु ॥ २९ ॥ शार्दूलविक्रीडितं वृत्तम् ।

श्रीति । श्रीभोजदेवः प्रभवः यस्य तस्य श्रीभोजदेवसुतस्य इत्यर्थः, राधानाम्नी देवी तस्याः सुतस्य श्रीजयदेवकस्य श्रीगीतविन्दकवित्वं श्रिया लक्ष्म्या राधारूपया इति भावः । यद्वा गीतः कीर्तितः गोविन्दः यत्र तादृशं तदाख्यमित्यर्थः कवित्वं पराशरादयः ये प्रियाः बान्धवाः तेषां वर्गः तस्य कण्ठे अस्तु विराजताम् ॥ ३० ॥ उपजातिवृत्तम् ।

ध्वी माध्वीक ! चिन्ता न भवति भवतः शर्करे ! कर्कशासि
ाक्षे ! द्रक्ष्यन्ति के त्वाममृत ! मृतमसि क्षीर ! नीरं रसस्ते !
ाकन्द ! क्रन्द कान्ताधर ! धरणितलं गच्छ यच्छन्ति भावं
ावच्छृङ्गार सारस्वतमिह जयदेवस्य विष्वग्वचांसि ॥ २६ ॥

इति श्रीगीतगोविन्दे स्वाधीनभर्तृकावर्णने सुप्रीत
पीताम्बरो नाम द्वादशः सर्गः ॥ १२ ॥

साध्वीति। इह संसारे विष्वक् सर्वोपि वचांसि यावत् शृङ्गार-सारस्वतं शृङ्गाररसवन्तीयं भावं यच्छन्ति प्राप्नुवन्ति आदर-णीयानि भवन्तीति भावः हे माध्वीक ! मधो ! भवतः चिन्ता साध्वी न भवति कोऽपि स्वाद न मन्यते इति भावः, हे शर्करे ! त्वं कर्कशा असि, हे द्राक्षे ! के जनाः त्वां द्रक्ष्यन्ति, हे अमृत ! त्वं मृतम् असि, हे क्षीर ! ते रसः नीरं जलं, हे माकन्द ! आम्र ! त्वं क्रन्द रोदनं कुरु, हे कान्ताधर ! प्रियाया अधरप्रदेश ! अति-स्पृहणीय इति भावः त्वं धरणितलं पातालं गच्छ। श्रीजयदेव-कवेः काव्यामृतपानेन परितृप्ताः सुधियः अन्यान् रसान् नाद्रियन्ते इति भावः ॥ २१ ॥ स्रग्धरावृत्तम्।

इति द्वादशः सर्गः ।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्यविरचिता
गीतगोविन्दकाव्यस्य विवृतिः समाप्ता।

समाप्तः ग्रन्थः।

প্রিণ্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
২০ নম্বর কামারপাড়া লেন

... १०

... ा १

१०६ [illegible]ालङ्कार सटीक १

१०७ सटीक निदान (वैद्यक) ४

१०८ कामन्दकी नीतिसार १

१०९ [illegible]भाष्यानुप्रकरण सटीक २

११० अत्रि विष्णु हारीत याज्ञवल्क्य उशना अङ्गिरा यम आपस्तम्ब संवर्त कात्यायन बृहस्पति पराशर व्यास शङ्ख लिखित दक्ष गौतम शातातप वसिष्ठ प्रणीत संहिता (धर्मशास्त्र) १॥

१११ [illegible]गृह्यसूत्र ६

११२ चरकसंहिता (वैद्यक) सम्पूर्ण ७॥०

११३ रसेन्द्रचिन्तामणि तथा रसरत्नाकर (वैद्यक) ६

११४ भगवद्गीता शाङ्करभाष्य आनन्दगिरिकृतटीकातथाबोधिनीसमेत ५

११५ [illegible] प्रकाशिका १

११६ [illegible]माधव सटीक १॥

११७ सटीक [illegible] ४

११८ सटीक [illegible] ४

११९ [illegible] १॥

१२० लघुकौमुदीव्याकरणम् ॥०

१२१ [illegible]नाटकम् (कलनाटक) १

१२२ [illegible]म् (अलङ्कार) १॥०

१२३ [illegible] (श्रीहर्ष कृत [illegible]) ६

१२४ भारत चम्पू सटीक १

१२५ मार्कण्डेयपुराणम् ५

१२६ [illegible] १

१२७ [illegible] १

१२८ पञ्चदशी (सटीक) २

१२९ [illegible]दर्शनस्य [illegible] १

१३० [illegible]नाटक टीका[illegible]

१३१ [illegible]

१३२ [illegible]संहिता वा [illegible]संहिता ४॥

१३३ [illegible] (जगदीशकृत) १॥

१३४ [illegible] १

१३५ [illegible] सटीक ११

१३६ [illegible] ॥०

१३७ [illegible] सटीक २

१३८ काव्यादर्श सटीक (अलङ्कार) ६

१३९ अष्टाङ्गहृदय संहिता (वाग्भटकृत वैद्यक) २

१४० शुक्रनीति सटीक

१४१ [illegible] सटीक ॥०

१४२ [illegible]पुराणम् ७

१४३ विष्णुपुराणम् ५

१४४ मीमांसादर्शन [illegible] १०)

१४५ [illegible] सटीक ४

१४६ [illegible] ४

१४७ [illegible] २

कलिकाता संस्कृत विद्यामन्दिरे—बि, ए, उपाधिधा[illegible]

श्रीजीवानन्द विद्यासागर-भट्टाचार्येण प्रकाशित [illegible]